अथउपदेशसाहस्री प्रारभ्यते पद्यबंधः उत्तरार्धः पत्रसंख्या

संवत् १९२६ शाके १७९१ श्रीराम समर्थ श्रीगुरु प्रसन्न



ॐ नमः श्रीमहागणपतये॥ ॥यत्राध्यस्तमिदं सर्वमेयंत्राद्यविद्यया॥भानिनोभानियद्भाः
नानंदास्मिब्रह्मचित्सुखं॥१॥तदेवंसर्वोपनिषदर्थसारसंग्रहंगद्यबंधेनसंक्षेपतोयुक्त्योपदिश्यपु
नस्तमेवार्थजातंपद्यबंधेनसोपस्करंविस्तरेणोपदेष्टुकामोभगवान्भाष्यकारः॥पद्यग्रंथारं
भेग्रंथप्रतिपाद्यपरदेवतानमस्काररूपंमंगलंकृतंशिष्यशिक्षार्थंश्लोकेनोपनिबध्नाति॥ ॥चैत
न्यंसर्वगंसर्वंसर्वभूतगुहाशयं॥यत्सर्वविषयातीतंतस्मैसर्वविदेनमः॥१॥चैतन्यमिति॥तस्मैसा
त्मने मान्यतःप्रसिद्धायनमः॥प्रह्वीभावोभूयादित्यर्थः॥तस्यविशेषजिज्ञासायांलक्षणमाह॥सर्व
विदिति॥सर्वंवेत्तीतिसर्ववित्तस्मै॥सर्वशब्देनभूतभौतिकविषयादित्वेनदासकंजगदुच्यते॥
तत्सर्वंसर्वावस्थंसर्वदासाक्षित्वेनानुसंधिसत्तामात्रेणप्रकाशयति॥सर्ववित्॥नहीदंजडंस्वस रा॰म॰१

८८ सत्तास्फुर्तिमदिदं तदस्ति सर्वज्ञं सर्ववित् सर्वाश्रय इतितटस्थलक्षणं भवतीतिभावः एवंजगत्सृष्टिस्थितिसंहारनियामकत्वेन २०

त्तास्फूर्त्योः स्वतंत्रं भवति ॥ अतो यदधीनसत्तास्फूर्तिमदिदं तदस्ति सर्वज्ञं सर्ववित् सर्वाश्रय इति
तटस्थलक्षणं सिद्धं भवतीति भावः ॥ एवं जगत्सृष्टिस्थितिसंहारनियामकत्वेन सन्मात्र
तया तटस्थेन लक्षितस्य स्वरूपलक्षणं वदन् सर्वविषयेषु [illegible] दत्ताश्रयतया सर्ववित्त्व
मिति वैशेषिकादिमताशंकां वारयन्ति ॥ चैतन्यमिति ॥ यच्चैतन्यं चि न्तुस्वभावं ज्ञानस्वरूपं तत्से त
इति ॥ यत्तच्छब्दयोः संबंधः ॥ विज्ञानमानंदं ब्रह्म सत्यं ज्ञानमनंतं ब्रह्मेत्यादिश्रुतिभ्यः ॥ न
२ ह्यचित्स्वभावस्य चिद्धर्मकत्वं युज्यते । नखल्वनुष्णस्वभावकं जलमुष्णत्वधर्मकं भवतीति ॥
भावः ॥ चिदेकरसस्यापि सर्वज्ञत्वं मायोपाधिकं व्यावहारिकमित्यनवद्यं ॥ ननु चेतनो ऽणुप
रिमाणः इत्येकदेशिनो मध्यमपरिमाण इति दिगंबरा मन्यंते ॥ अतस्तस्य सर्वविषयसंसर्गा
भावे कथं सर्वज्ञत्वं प्रकाशो ऽहिं साविन्नादिः स्वसंसृष्ट एव प्रकाशव्यवहारहेतुर्नासंसृष्टे वि
षये इत्यत आह ॥ सर्वगमिति ॥ नित्यं विभुं सर्वगतं आकाशवत्सर्वगतश्च नित्यः ॥ सर्व
र्वगात्वकमित्याह श्रुतिविरोधादणुपरिमाणवादिमतं [illegible] काशा इति ॥ उत्का

उपे॰ त्वादेर्लिंगोपाधिकत्वश्रवणात्तेनेन स्वाभाविकविभुत्वार्थकश्रुतिबाध इति दिक्॥ ननु सर्वगमित्युक्ते सर्व
२ मध्येतद्गतं च ब्रह्माप्यादित्यस्य वस्तुपरिच्छेदप्रतिभासात् स्यादिमं न वसजातीयविजातीयभेदवत्वं
प्राप्तमित्यत आह॥ सर्वमिति॥ सर्वं खल्विदं ब्रह्म॥ इदं सर्वं यदयमात्मा॥ आत्मैवेदं सर्वमित्यादिश्रुतेर
त्यर्थः॥ अनेन सर्वोपादानत्वमुक्तं॥ उपादानं हि सर्वकार्यं सर्वव्याप्नुवद्व्यापकं भवति नानुपादानं तद्दे ह्रू क ४
देशेन संसृज्यमानमव्यापकमेव भवतीत्यतः सर्वोपादानत्वात्सर्वमित्यभिप्रायः॥ सर्वात्मकमपि नेनु
ब्रह्म जीवाद्याप्तनं जीवस्य ब्रह्मणो भिन्नत्वान्न ह्यसंसारिसंसारिभावेन विरुद्धधर्मवतोरैक्यं संभवति
दहनतुहिनवदित्यत आह॥ सर्वभूतगुहाशयमिति॥ सर्वभूतानां स्थावरजंगमानां गुहासु बुद्धिषु शेत इति
सर्वभूतगुहाशयं॥ गूढा अस्यां ज्ञानज्ञेयज्ञातृपदार्था इति गुहा बुद्धिः गूहतेः संवर्णार्थस्य धातो १
रिदं रूपं सर्वप्राणिबुद्धंतः॥ साक्षितया निर्विकारं वर्तत इत्यर्थः॥ तथा च श्रुतिः॥ यो वेद निहितं गुहायां पर
ह मे व्योमन्॥ ध्यं तत्रोभिः पुरुषः॥ स वा एष आत्मा हृदि तस्यैतदेव निरुक्तं हृदयमित्यादि॥ तथा
चेतनस्त्वात्तदेवानुप्राविशदित्यादिना स्रष्टुरेव ब्रह्मणो जीवरूपेण प्रवेशश्रवणादयमात्मा ब्रह्मेत्या
दिनादात्म्यश्रुतेश्च न ब्रह्मणो जीवाद्भेदोऽवधार्यते॥ विरुद्धधर्मसंसर्गप्रतिभासस्तूपाधिनिबंधनो
न स्वरूपनिबंधन इति भावः॥ [illegible] भेदाभेदवादिपक्षा राम २

ॐ निरोधनाबोदितव्याः॥ ननु सर्वभूतगुहाशयत्वे ब्रह्मणो मानसवेद्यत्वं स्यात्तथा सर्वात्मत्वे प्रपंचात्मत्वप्राप्तेरि=
ति शंकायामाह॥ यत्तु सर्वविषयातीतमिति॥ सर्वमाविद्यातत्कार्यात्मकं विषय मतीत्यावस्थितात्मेत्यक्षरा
र्थः॥ मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमित्यादिश्रुतेः॥ परमेश्वराधिष्ठितमायाविवर्तत्वावगमात्सर्व
स्य मायया श्चानिर्वचनीयत्वान्न परमार्थतः किमपि ब्रह्मणो भिन्नं वस्त्वस्ति तथा तत्सर्वांतःकरणतत्सर्वावसा
क्षिणो न मानसवेद्यत्वं संभाव्यते न हि मिथ्या दृष्टिगृहीतेन मरीच्युदकादिना भूम्याद्युदकादिमत्परमार्थतो
भवति॥ न वा काष्ठेनाग्निः प्रकाश्यते दह्यते वा अतो युक्तं सर्वविषयातीतत्वमिति भावः॥ तथा च श्रुतिः॥
नेह नानास्ति किंचन यतो वाचो निवर्तंते अप्राप्य मनसा सहेत्याद्या॥ अत्र चैतन्यमित्यादिविशेषणत्रयं
3 तत्त्वंपदार्थसाधारणं सर्वभूतगुहाशयमिति च बुद्ध्यादिसाक्षी त्वंपदार्थ उक्तः॥ सर्वात्मेतिपदेन तत्सद्वा
च्यं ब्रह्मोच्यते सर्वविषयातीतमित्यनेन तत्पदलक्ष्यमुक्तं तत्त्वंपदयोः॥ समानाधिकरण्यादेकार्थवृत्तित्वे स
ति तत्त्वंपदार्थयोरैक्यमखंडवाक्यार्थस्तात्पर्यवृत्त्या प्रतिपादितो भवति॥ तदेवं मंगलाचरणव्याजेन
वेदांतशास्त्रीयवैषयाद्यनुबंधोपन्नप्रपंचितोः स्पष्टप्रकरणत्वद्योतनाय तथा हि उक्तवाक्यार्थः॥
विषयस्तेन त्वं सर्वविषयातीतमिति चाचिदात्मनः सर्वानर्थसंस्पर्शित्वाभावोक्तेरत्त्वबोधानर्थनिवृ [illegible] सु
पलक्षितं निरतिशयानंदावाप्तिः सप्रयोजनमुक्तं॥ अथ ज्ञानक्रमाधिकारी सूचित एव भव

ष्टे भाव

उ॰दे॰ ३ ति ॥ उक्तविशेषणानां वेदान्तेषु प्रसिद्धेः ॥ शास्त्रब्रह्मणोः प्रतिपाद्यप्रतिपादकसंबंधो ध्वनितः ॥ ३ ॥ ए म॰ ६
वं देवतानमस्कारव्याजेन वेदान्तप्रतिपाद्यपरदेवतातत्त्वमुपाक्षिप्तमिदानीं वेदस्य ज्ञानपरत्वं प्रतिपाद गा
यितुं कर्मकांडनिर्वृत्तमर्थमनूद्य तेन ज्ञानकांडाख्यवेदान्तानां संगतिमभिदधत्तत्प्रामाण्यार्थत्वमंत्येषो न
पलंभयतावदाह ॥ समापय्य क्रियाः सर्वा दारागन्याधानपूर्विकाः ॥ ब्रह्मविद्यामथेदानीं वक्तुं वेदः प्रचक्रमे ॥ ४ ॥
समापय्येति ॥ वेद इदानीं ब्रह्मविद्यां वक्तुं प्रचक्रम इत्यन्वयः ॥ इदानीमिति जिज्ञासोरुपस्थितिसमय उक्तः ॥
अथेति ॥ जिज्ञासाप्रवृत्तिप्रयोजकहेतुसाधनचतुष्टयसंपत्त्यानंतर्यमुच्यते ॥ तथा च विवेकवैराग्यशमद
मादिसाधनसंपन्नस्य मुमुक्षोर्मोक्षसाधनं ब्रह्मविद्यां साक्षात्प्रतिपादयितुं ज्ञानकांडात्मको वेदः ॥
प्रवर्तत इत्यर्थः ॥ कुतोऽस्य साधनसंपत्तिरित्यपेक्षायां कर्मकांडोक्तकर्मानुष्ठानजनितबुद्धिशुद्धित इत्यभि
विधि प्रेत्याह ॥ समापय्येत्यादिना ॥ दारागन्याधानपूर्विका इति ॥ विहितक्रियामात्रोपलक्षणं नित्यनैमित्तिकप्रायश्
चित्तोपासनारूपाः सर्वाश्रमप्रयुक्ता विहिताः सर्वाः क्रियाः समापय्य समाप्तिं प्रापय्य कर्मकांडात्मना अ
नुष्ठेयकर्माणि प्रतिपाद्य स्थितो वेद इति संबंधः ॥ अयं भावः ॥ वेदो हि स्वतः प्रमाणभूतः सर्वार्थप्रका
शकोऽनित्यानिरतिशयपुरुषार्थसाधनं प्रत्यक्षादिभिरनवगम्यमानमुपदेष्टुं प्रवर्तते नित्यनिरतिशय
पुरुषार्थश्च मोक्ष एव नान्य इति ॥ मोक्षोपायप्रतिपादने वेदतात्पर्यमवगम्यते ॥ श्रुतिस्मृती चात्र

स्मर्यते ॥ न स्यात्तदुःखाय प्रमृष्यत सर्वैः सोऽहं प्रयतमानस्यापि नमलभमानस्य तादृक् दम३

य पुरुषार्थ

वेदांतवेद्य
विदि

भवन्तः॥सर्वेवेदायत्पदमामनंतिसर्वेघेदायत्रैकंभवंतिसमानसीनआसाजनानामिति॥वेदैश्चसर्वैरहमेव
वेद्यो [illegible]त्ति च॥मोक्षसाधनंचसाक्षात्सत्त्वज्ञानमेवतमेवविदित्वातिमृत्युमेतिनान्यःपंथाविद्यतेऽयनायेतिश्रु
तेस्तच्चनाशुद्धांतःकरणस्योपदेष्टुंयुक्तंतस्यतद्ग्रहणसामर्थ्याभावात्॥श्रुतिश्चभवति।नाविरतोदुश्चरितान्नाशा
तोनासमाहितः॥नाशांतमानसोवापिप्रज्ञानेनैनमाप्नुयादिति॥अतस्तस्यज्ञानोत्पत्तिप्रतिबंधकदुरितक्षया
र्थानिनित्यानिकर्माणिप्रथमंविधीयंते।तानिचसंयोगरूपचोदनासमाख्यानामविशेषेणसर्वशास्त्रप्रत्ययन्या
ने येनितं कर्तव्यांगकलापपरिमाणाधिकारिविशेषोक्तिपूर्वकमनुष्ठापयंति॥धर्मेणपापमपनुदतीति।नकर्मलिप्य प
तेनरे।अविद्ययामृत्युंतीर्त्वेत्यादिश्रुतेर्दुरितक्षयएवधर्मानुष्ठानस्यपरंप्रयोजनंपरंपरयापरमपुरुषार्थोपयोगि
त्वान्ननुकर्मणापितृलोकइत्याद्युक्तःपितृलोकादिःप्रयोजनंतस्यक्षयादिदोषदुष्टतयाहेयत्वात्॥आनुषंगिक
५ हितत्कर्मफलंभवति॥भवदपिनेदंचित्तशुद्धिप्रतिबंधकं॥तदुक्तंसुरेश्वराचार्यैः॥नित्येषुशुद्धिःप्राधान्याद्गौणप्र
प्रतिबंधकः॥भोगंभंगुरमीक्ष्यातेशुद्धिमुद्दिश्यरोचनादिति॥काम्याभिचारादिकर्मविधानंतुपुरुषवैराग्यका क
रणेनस्वाभाविकप्रवृत्तिनिवारणार्थमभिलेषादिवत्॥तथाचचित्तशुद्धेःप्रथमापेक्षितत्वात्तदर्थंकर्मविधा
नंप्रथमंप्रवृत्तंनपश्चाच्चज्ञानोपदेशःइतिकर्मज्ञानकांडयोरर्थद्वाराहेतुहेतुमद्भावेनपौर्वापर्यसंब
धउक्तोज्ञानकांडस्यसाक्षात्फलार्थविषयत्वात्कर्मभिरनपेक्षितार्थबोधागतार्थसमर्थ्यशेषसंबं न
तस्यासिद्धमिति॥२॥ननुकर्माण्याकृतानिकर्तुःफलंदृष्टंलोकेआनाय॥यत्रभावितार्थभिरुपदिष्टविषयाणि इ

४ ष्टफलानि तैः। निषिद्धविषयाण्यनिष्टफलानि तद्व्यासक्तविषयाणि दैवाधीनतयोभयार्थानि तथा वेदविहितानि
कर्माणि इष्टफलानि निषिद्धान्यनिष्टफलानि विहितमतिषिद्धव्यामिश्रकर्माणीष्टानिष्टव्यामिश्रफलानि
भवंति। तथा च शास्त्रं। अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलमिति। एवं च कर्मणः फलाद्यभिना
शान्मोक्षस्य च फलविशेषत्वात्कर्मविशेषसाध्यत्वोपपत्तेः। ननु यथा कल्पमतानि नित्यं तदर्थानि ता वि
न कांडनि मुमुक्षुणा विचारणीयानि। किं तु कर्माण्येव कानि चि ज्ञातुं मा स्यादीन्यस्य फलार्थमनुष्टे
श्रुत यानीति कर्मजडानामवस्थानमाशंक्याह कर्माणि देहयोगार्थं देहयोगे प्रियाप्रिये। ध्रुवे स्यातां ततो रागो
द्वेषश्चैव ततः क्रियाः॥३॥ कर्माणीति द्वाभ्यां॥ कर्मफलं हि जात्यायुर्भोगलक्षणं न च देहसंबंधं विना
५ नोपपद्यत इति कर्माणि योगार्थमेवेत्यर्थः॥ देहयोगे च संसारोद्धुर्वार इत्याह देहयोग इति देहसंबंधे स
ति प्रियाप्रिये सुखदुःखयोस्तत्साधनयोश्च यथासंख्यं रागद्वेषौ वासनारूपौ स्यातां ततो रागद्वेषाख्यानि
मित्तात्क्रियाः। वाङ्मनःकायचेष्टाः स्युरित्यर्थः॥३॥ धर्माधर्मौ ततो तस्य देहयोगस्ततः पुनः॥ एवं नि
त्यप्रवृत्तोयं संसारश्चक्रवद्ध्रुवं॥४॥ अज्ञस्य भ्रमणासक्तं ब्रह्म जानतो हंकारपरवशस्य ततः क्रियाभ्यो
विहितप्रतिषिद्धरूपाभ्यो धर्माधर्मौ पुनर्भवेतां पुनस्ततो देहयोगस्ततः प्रियाप्रिये इत्येवं संसारेजन्मम
रणकर्मकरणतत्फलभोगलक्षणः कुलालचक्रवद्ध्रुवमवश्यं सदा भवन्तं [illegible] तथा नित्यप्रवृत्तो ना रामः
सुखदुःखेषु वेसा तां भवेतामेव न हि वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्तीति श्रुतेः॥ ततः

दिकालमारभ्य प्रवर्त्तते अयं प्रत्यक्ष इत्यर्थः॥ तस्मादैहिकार्थानां कर्मणामनित्यफलत्वस्य लोके दृष्टत्वादामुष्मिक
फलार्थानामपि कर्मत्वादनित्यफलत्वानुमानात् यथेह कर्मजितो लोकः क्षीयते एवमेवामुत्र पुण्यजितो लोकः
अ म क्षीयते इति वस्तुबलानुरो॰ श्रुतेश्चाक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतमित्याद्यर्थवादश्रुत्यबलं बाधते न कर्म
फलस्यानित्यत्वाशंकानर्थकेति भावः॥४॥ ननु एवमपि मोक्षार्थिनो ज्ञानेन प्रयोजनमस्तु न कर्मणां संसारमितानां नि
फलभोगानंतरं नाशे सानिनिमित्ताभावान्नैमित्तिकाभाव इति न्यायादेव फलभ॰ त्वान्मोक्षस्येत्याशंक्य ज्ञानमूल या
त्वात्कर्मणस्तस्मिन्सति न त्वनुपरमात्मैवामिति आह॥ [illegible]
5 [illegible]क्षय॥ अज्ञानं तस्य मूलं स्यादिति तद्धानमिष्यते॥ ब्रह्मविद्यात आरब्धा ततो निःश्रेयसं भवेत्॥ यद्वा ॥५॥
ज्ञस्य कर्मप्रवृत्त्ये विरामात्संसाराविरामः॥ कृतकर्मफलभोगसमयेपि कर्मप्रवृत्त्यवश्यंभावात्पुनर्भोगसंता
नाविच्छेदश्चेत्कथं तर्हि कर्मनिवृत्त्या मोक्षसिद्धिरिति वीक्ष्यमाह॥ अज्ञानमिति॥ अयम॰र्थः॥ नीहारेण
प्रावृता जल्प्या चासुतृप उक्थशासश्चरंति॥ एकः शत्रुर्न द्वितीयोस्ति शत्रुरज्ञानतुल्यः पुरुषस्य राजन् येनावृतः कु
३ श्ला र्वते कार्यनि घोराणि कर्माणि सुदारुणानीत्यादिश्रुतिस्मृतिभ्योज्ञानं तस्य पूर्वोक्तस्य कर्मफललक्षणस्य सं
सारस्य मूलं स्यादिति हेतोस्तस्याज्ञानस्य हानमात्यंतिकोपरमस्तस्मिन्प्रयत्नेन संपादनीयतयाभिप्रेयते मूलो

न्मूलनमंतरेणशरीरत्यागेछेदादित्यर्थः॥नरतिशोकमात्मवित्॥यदाचर्म[illegible]वदाकाशंवेष्टयिष्यंतिमान
५ वाः॥तदादेवमविज्ञायदुःखस्यांतोभविष्यति॥ज्ञानेनतुतदज्ञानंयेषांनाशितमात्मनः॥तेषामादित्य
वज्ज्ञानंप्रकाशयतितत्परमित्यादिश्रुतिस्मृतिभ्योयतोविद्यैवाज्ञानहानहेतुरवगताऽतोब्रह्मविद्याख्या
ततोब्रह्मविद्यायानिःश्रेयसंकैवल्यंभवेन्नदुहृयेनांतरीयकतयाज्ञाननिवृत्तौकेवलात्मब्रह्मस्वरूपावस्था
नरूपोमोक्षोलब्धइवभवेदित्यर्थः॥५॥ननुकर्म[illegible]विविदिषाशक्तिरवाहि[illegible]यदाअमृतत्वंभजंतइत्या
दिश्रुतेश्चकर्मणैवहिसंसिद्धिमास्थिताजनकादयइत्यादिस्मृतेश्चकर्मभिरेवमोक्षसिद्धेःकुतंब्रह्म
विद्ययेतिशंकामपाकुर्वन्ननंतरोक्तमर्थमुपपादयतिद्वाभ्यां॥ ॥विद्यैवाज्ञानहानायनकर्माप्रतिकूलतः
नाज्ञानस्याप्रहाणेहिरागद्वेषक्षयोभवेत्॥६॥विद्यैवेतिसंसारमूलज्ञानहानायविद्यैवसमर्थेत्यध्याहा
रः॥एवकारार्थमाह॥नकर्मेति॥तत्रहेतुरप्रतिकूलत्वइत्यविरोधादित्यर्थः॥विद्यैवप्रकाशरूपत्वात्अ
व प्रकाशरूपामविद्यांतत्कार्यंचानिवर्तयति॥यथोरज्ज्वावरणं[illegible]नमासितत्कल्पितसर्पाद्याकारंचरज्जु
तत्त्वज्ञानप्रदीपोनिवर्तयत्तःस्वभावविरोधात्कर्मतुनाज्ञानतमोनिवर्तकंतदविरोधित्वादप्रकाशात्मक
त्वादुनीहारस्तोमवदित्याद्यनुमानैर्नान्यःपंथाइत्यादिश्रुतिभिश्चाविरोधेमपरेप[illegible]तोनतदुल्लंकमभि
[illegible]कनत्तंपर्यवस्यति
इत्यादि

[illegible]रत्नानहा
गा नशंकेत्यभिर्यः॥विद्याविनाज्ञानक्षयाभावश्चेदज्ञानक्षयार्थमेवाविद्यानुष्ठानंनकार्यस्यतुपरमार्थ
त्वादिस्वप्यानाशानुपपत्तेस्तत्राहोहेत्वंतरमन्वेषणीयमित्यत आह॥नाज्ञानस्येति॥अज्ञानस्यापहारोरा
गादिक्षयोनभवेदविवेकपूर्वकत्वस्यरागादावन्वयव्यतिरेकासिद्धत्वादज्ञानमपारागादयोनपरमार्थाइ
त्यज्ञाननि[illegible]स्येवनिर्वर्तनीयानितिनतत्रहेत्वंतरान्वेषणेत्यर्थः॥६॥रागाद्यनिवृत्तौकाहानिरितिनत्राह॥रागद्वेष
6 क्षयाभावेकर्मदोषोद्भवंध्रुवं॥तस्मान्निःश्रेयसार्थायविद्यैवात्रविधीयते॥७॥रागद्वेषेति॥दोषाःरागद्वेष
मोहास्तदुद्भवंतद्धेतुकंकर्मध्रुवंपुनःस्यादेवेतिपुनःसंसारोदुर्वारइत्यर्थः॥उपपादितमर्थमुपसंहरति॥त सं
स्मादिति॥अत्रोच्यते।अत्रवेदान्तोक्तिःविधीयतेप्रकाशनइत्यर्थः॥७॥नदेवमज्ञानमूलत्वात्संसा
रस्याज्ञानमेवतन्निवर्तकंमोक्षहेतुर्नकर्मेत्युक्तंतत्रयदिकर्मणांस्वातंत्र्येणमोक्षहेतुत्वानसंभवेत्तर्हि
ज्ञानेनसमुच्चयेसतितद्धेतुतास्यादितिसमुच्चयवादिमतमुपन्यस्यति॥ ॥ननुकर्मतथानित्यंक
र्तव्यंजीवनेसति॥विद्यायाःसहकारित्वंमोक्षंप्रतिहितद्भजेत्॥८॥ननुकर्मेति।नहिकश्चित्क्षण
मपिजातुतिष्ठत्यकर्मकृत्॥कार्यतेह्यवशःकर्मसर्वःप्रकृतिजैर्गुणैरितिस्मृत्युक्तन्यायेनावशेन। रामः

ष्य जीवता पुरुषेणापि कर्म कर्तव्यमेवमभिधाय यथा तथा नित्यं कर्मावश्यं कर्तव्यं यावज्जीवमित्यादिश्रुतिवि ५
हितत्वादित्यर्थः ॥ उपयोगाभावान्मुमुक्षुणा नित्यं कर्म न कर्तव्यमित्यत आह ॥ विद्याया इति ॥ विद्याया
मोक्षं प्रति कारणभूतायाः सहकारित्वमिति कर्तव्यभावं हि यस्मात्कर्म विज्ञे प्राप्नुयादतस्तत्कार्यं मु
मुक्षुणेत्यर्थः ॥ विद्ययामृतमश्नुत इति तृतीयया ज्ञानस्य मोक्षकारणत्वावगमात्कारणस्य चेतिकर्त
व्यतासापेक्षत्वादन्यस्य चेतिकर्तव्यस्याभावात्कर्मभिरेव यथा [illegible]जादिभिरीश्वरार्पितफलोपकार्य
मैर्ज्ञानं समुच्चीयत इति भावः ॥ ८ ॥ कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते ॥ तस्मात्कर्म न कुर्वन्ति यत
यः पारदर्शिनः ॥ इत्यादिस्मृतेर्मुमुक्षुभिः कर्म न कर्तव्यमेवेति चेत्तत्राह ॥ ॥ यथा विद्या तथा कर्म चो
दितत्वाविशेषतः ॥ प्रत्यवायस्मृतेश्चैव कार्यं कर्म मुमुक्षुभिः ॥ ९ ॥ यथा विद्येति ॥ ॥ यथा विद्या मु-
-तथा मुक्षुभिः ॥ कार्या कर्मापि कर्तव्यं कुतः ॥ विद्यां चाविद्यां च यस्तद्वेदोभयं सहेति समुच्चयविधिना विशेष
णचोदितत्वादित्यर्थः ॥ किंच अकुर्वन्विहितं कर्म निन्दितं च समाचरन् ॥ प्रसज्जंश्चेन्द्रियार्थेषु नरः पत
नमृच्छतीत्यननुष्ठाने प्रत्यवायस्मृतेश्च कर्म कार्यमित्यर्थः ॥ तथा चोदाहृतश्रुतिस्मृतिविरोधस्तस्मा
त्कर्म न कुर्वन्ति यतयः इति इयमपरस्मृतिर्ज्ञाननिष्ठसंन्यासार्थो वा [illegible] भाविष्यतीति भावः ॥ ९ ॥ अत्रासि
द्धान्ती विद्यायाः सहकार्यपेक्षित्वमुक्तमाक्षिपति ॥ नन्वध्रुवफला विद्या नान्यत्किंचिदपेक्षते ॥ भा रामः

ग्निष्टोमो यथैवान्यैर्नु ध्रुवकार्योऽप्यपेक्ष्यते ॥ न्तु मुवफलानि वा कर्म नित्यमपेक्ष्यते ॥३०॥ नाभिक्षेति ॥ ब्रह्मविद्या
सहकारिनिरपेक्षा ध्रुवफलत्वाद्यद्वा दृग्ज्ञानवदित्यर्थः ॥ पूर्ववादी व्यभिचारेण परिहरति ॥ नेति ॥ अध्रुवसंभावि
फलोऽप्यग्निष्टोमो यथोक्तः । थरा स्वर्गादेस्तद्वत्तदेव तावज्ज्ञानसहकारि कर्मापेक्षते । तथा विद्यापीत्यर्थः ॥ पूर्वपक्षमु १०
पसंहरति ॥ इत्येवं केचिदित्यन्ते । न कर्मप्रतिकूलतः ॥ विद्यायाः प्रतिकूलं हि कर्म स्यात्साभिमानतः ॥३१॥ इत्येवं
केचिदित्यन्तेनेति ॥ सिद्धान्तं वक्तुमुपक्रमते ॥ नेत्यादिना ॥ विद्या स्वकार्ये न कर्मापेक्षते तत्प्रतिकूलत्वात्तद्विरोधि
त्वादिति यावत् ॥ न हि स्वप्रतिकूलः स्वसहायो भवति ॥ मा भूत्तिमिरं तेजसः ॥ सहायभूतमित्यर्थः ॥ कर्मणो
विद्याप्रतिकूलत्वमुक्तं साधयति ॥ विद्ययोरित्यर्थे न हि शब्दः प्रसिद्ध्यवद्योतकः ॥ साभिमानतः इति ॥ ब्राह्म
ण्याद्यभिमानेन सहितेन पुरुषेण निर्वर्त्यत्वात्कर्मणो विद्यायाश्च कूटस्थात्मसाक्षात्काररूपाया जात्याद्यभिमानहीनान्निष्ठ
त्वात्प्रसिद्धो विद्याकर्मणोर्विरोध इत्यर्थः ॥३१॥ हिशब्दद्योतितां प्रसिद्धिमुपपादयति ॥ निर्विकारात्मबु
द्धिश्च विद्येतीह प्रकीर्तिता ॥ अहं कर्ता ममेदं स्यादिति कर्म प्रवर्तते ॥३२॥ निर्विकारेति ॥ नाहं कर्ता भोक्ता किंतु कू का
टस्थं ब्रह्मैवास्मीत्येवमालाकारोतः ॥ करणव्युत्पत्त्या विद्येतीह वेदान्तेषु विद्वद्भिः प्रकर्षेणोक्तेत्यर्थः ॥ कर्मत्वाह
ब्रह्मणोऽस्य कर्मणः कर्ता ममेदं कर्मसाध्यं फलं भविष्यतीत्यभिमानपूर्वकं प्रवर्तते इति प्रत्यक्षमतो स्फुटे

उप. स. ७ विरोध इत्यर्थः ॥१२॥ ज्ञानकर्मणोरन्तर्मुखत्वबहिर्मुखत्वाभ्यां प्रवृत्तितो विरोधमुक्त्वोत्पत्तितोऽपि विरोधमाह ॥ प. १
वस्त्वधीना भवेद्विद्या कर्त्रधीनो भवेद्विधिः ॥ कारकोपमृद्ज्ञानं विद्या बुद्धिमिवोरवेः ॥ इति तत्सत्यमादाय कर्म
कर्तुं व्यवस्यति ॥१३॥ वस्त्वधीनेति प्रमाणवस्त्वधीना विद्या यथा प्रमाणं यथा वस्तु च जायते न तत्र पुरुषस्वातं
त्र्यं संभवतीत्यर्थः ॥ विधिर्विधेयं कर्म कर्त्रधीनं पुरुषेण कर्तुमकर्तुमन्यथा वा कर्तुं शक्यमतः पुरुषस्वातंत्र्या
स्वातंत्र्यरूपविरुद्धहेतुजन्यत्वान्न कर्मज्ञानयोः समुच्चयेत्यर्थः ॥ किंच विद्यायां सत्यां कर्मणो निराश्रयत
ति या स्वरूपालाभान्न ज्ञानसहकारित्वेऽविधानरेणापि विरोधमाह ॥ कारकारी . त्तिउत्तरदेवज्ञानी मुदकबुद्धिप्र
धीश्वरस्वभावावलंबिनी ॥ विद्योपमृद्याति न तथान्या विद्या ध्यस्तकारकबुद्धिमात्मस्वभावावलंबिनी ॥ विद्यो
पमृद्यात्येवेत्यर्थः ॥ इति तत्सत्यमीदृश्येश्लोकः ॥ पूर्वेणैवान्वे ति ॥ उपमृद्यातीति ॥ यतो तत्तत्कारकजा
नं सत्यमादाय कर्म कर्तुं ज्ञानी कथं व्यवस्यतीति कथं शब्दाध्याहारेण योजनीयः ॥१३॥ ॥ विरु
रु द्धत्वा न्न समुच्चयसंभवं फलितमाह ॥ विरुद्धत्वादतः शक्यं कर्म कर्तुं न विद्यया ॥ सहैव विदुषा तस्मात्कर्म
हेयं मुमुक्षुणा ॥१४॥ विरुद्धत्वादिति ॥ अतो विरुद्धत्वादिति सामानाधिकरण्यं विद्यया सह कर्म कर्तुं विदु
षो न शक्यमेवेत्यन्वयः ॥ समुच्चयनिराकरणफल माह ॥ तस्मादिति ॥१४॥ ननु ज्ञात्वा कर्म समाचरेदित्या
दिवचनात् स्वर्गकामादिविध्यन्यथानुपपत्तेश्च देहादिव्यतिरिक्तात्मज्ञानवतः कर्माधिकारात् ॥ ज्ञानकर्मणोः राम ७

विरोधेनतद्योगा दधिकार्यभावेन कर्मकांडस्याप्रामाण्यं प्राप्तमित्याशंक्यकर्मस्वरूपभेदांगविशे
षप्रयुक्तिक्रमाधिकारादिविशेषज्ञानस्य देहादिव्यतिरिक्तात्मज्ञानस्यचकर्मविशेषाधिकारिण्य
पेक्षितत्वेपिन परमात्मतत्वज्ञानंतत्रापेक्ष्यते तदुपयोगाद्यधिकारविरोधाच्चेत्यभिप्रेत्य समाधत्ते।।
यद्वा यद्योपनिषदं ज्ञानंकर्म ... कारकभेदोपमर्दकं स्यात्तदाज्ञानकांडेनकर्मकांडस्यनिर्विषयी
करणाद्वधि तविषयंकर्मकांडंप्रमाणंस्यात्तत्रानिष्टं स्वाध्यायाध्ययनादिविधिविरोधादित्याशंक्य।
किमात्मतत्वज्ञानात्प्रागूर्ध्वं वातदप्रामाण्यापत्तिरितिविकल्प्याद्यंनिराकरोति।। ।।देहाद्येरवि
शेषेणदेहिनोग्रहणंनिजं।।प्राणिनांतदविद्योत्थंतावत्कर्मविधिर्भवेत्।।१५।।देहाद्यैरिति।।देहिन
आत्मनोदेहाद्यैर्देहेंद्रियमनोबुद्धिप्राणतद्धर्मैरविशेषेणाविवेकेनग्रहणंतद्विशिष्टत्वेना
त्माभिमानरूपंनिजंस्वाभाविकंनयोषि...दादवस्रादिभावबुद्धिवद्विध्यधीनंयदेवंविधंप्राणि
नामात्मतत्वविद्योत्थमनाद्यज्ञानजंभ्रांतिसंस्कारोत्थंसर्वसाधारणंत्वावावदेवंब्राह्मणोहंगृह
स्थोहंसकलेंद्रियवानहं सकामोबलवानित्यात्मज्ञानमनुवर्तते तावत्कर्मविधिः कर्मकांडंप्रमा

उपे॰स॰ णंभवेदित्यर्थः॥प्रमितिजनकंहिप्रमाणंभवतिअधिकारिणश्चप्रमितिजनकोवेदोनानधिकारिणइति
८ स्थितेकर्मप्रवृत्तिपर्यंतप्रमितिजनकस्यविधिकांडस्योक्ताधिकारिणंप्रतिब्रह्मात्मतत्त्वविद्योदयात्प्राग
प्रामाण्यमस्तीतिनिनाध्ययनविधिविरोधइतिभावः॥१५॥द्वितीयंकल्पमभ्युपगम्याप्रत्याचष्टे॥ ॥ने
तिनेतीतिदेहादीनपोह्यात्मा वशेषितः॥अविशेषात्मबोधार्थंनेनेत्यवर्तत॥३६॥ने[illegible]नेतीति यानि
वीप्सार्थयाश्रुत्यादेहादीन्मिथ्यादृष्ट्यात्मीयभावेनगृहीतानशेषानपोह्यप्रतिषिध्यप्रतिबोधावध
धिभूतआत्मा वशेषितःसत्यस्यसत्यमित्यादौकिमर्थमित्यतआह॥अविशेषात्मबोधार्थमिति॥अवि
शेषश्चासावात्माचेतितदर्थात्तस्यबोधोनिर्विशेषचित्सदानंदस्वभावाविर्भावस्तदर्थमित्यर्थः॥परागर्थे
ष्वपोहितेषुतदवधित्वेनप्रत्यगर्थएवा वशिष्यतइति॥प्रत्यक्तत्त्वबोधार्थमित्युक्तंभवति॥बोधेस
ने तिकिंस्यात्तदाहनेनेति॥यन्निबंधनोदेहादावात्माभिमानःकर्माधिकारहेतुःसाविद्यातेनबोधेननिवर्ति
ताबाधितेत्यर्थः॥अतोनिमित्ताभावान्नैमित्तिकाभावइतिन्यायेनात्मतत्त्वज्ञानवतोनकर्मविधिप्र
तिपत्तिरितितंप्रतिफलवद्विज्ञानजनकत्वाभावात्कर्मकांडस्यतदानीमप्रामाण्यमिष्टमेव॥निवृत्तोऽप्र श्रीराम ८

क्रोधंप्रत्यभिचारविधिशास्त्रबादेतिसर्वमनवद्यं॥६६॥ननुनिर्विशेषात्मबोधेनसकृन्निवृत्ताप्यविद्यापु
नरुद्भविष्यतिततःकर्माधिकारहेतुसंभवात्कर्मविधिःस्याच्छुक्तिरजतावगमानंतरं ज्ञाननिवृत्तापिपुनस्तत्र
समयांतरेरजत.भ्रमोदयोपलंभादित्याशंक्याह॥ ॥निवृत्तासाकथंभूयःप्रसूयेत प्रमाणतः॥असत्यैवा
१ विशेषेपिप्रत्यगात्मनिकेवले॥६७॥निवृत्तेति॥प्रमाणतोनिवृत्ताप्रमाणाग्निनादग्धासाविद्याभूयःकथं
प्रसूयेतजायेतनहिमृतादग्धाचभार्यापुनःप्रसवायोद्भवतितद्वदित्यर्थः॥अविद्यांतरंजायेतेतिचेन्नत्र
नाद्य अ अक्रृत्यकिंनिर्निमित्तंजायेतनिमित्ताद्वाकारणकार्योत्प नावतिप्रसंगाद्द्वितीयेकिमात्मानिमित्तमनात्मा
वानाद्यइत्याह॥असत्यैवेति॥अविशेषेकेवलेइत्यनयोर्व्याख्यानव्याख्येयभावः॥यद्वाविशेषइत्युक्तेभू
त्यादिकनिपयविशेषाभावेपिविशेषांतरशंकास्यादतउक्तंकेवलेइतिनाचल्युक्तेएकाकिनोप्यात्म
नःप्रयत्नादिगुणयोगित्वाविशेषइत्युक्तंतथाचाविशेषेकेवलेप्रत्यगात्मनिसर्वातिरेणपरमार्थवस्तुनि
सत्याविद्यासतीएवनसत्तांलभतेअसहायस्यात्मनःकूटस्थस्यकर्तृत्वानुपपत्तेः॥अविद्यांतरसहाया
भ्युपगमेचान्योन्याश्रयोनवस्थावाप्रसज्येतेत्यर्थः॥अपिशब्देनपक्षांतरंनिरस्यते॥अनात्मनः सत्से ध
वसा अविद्याकार्यस्यानात्मनोविद्याहेतुत्वानुपपत्तेरित्यर्थः॥शुक्तिकादौतुरजतादिविक्षेपोपा
दानांशस्यैवाविद्यायावान्निभेदस्यज्ञानेनानिवृत्तत्वाभ्युपगमान्मूलाज्ञानस्यतादृगनंतशक्तिमत्त्वोवि

शंकास्यान्निवृत्तये। विशे १५

उप.स. द्यमानत्वात्तद्‌ज्ञानस्य पुनर्भ्रांत्युदयोपपत्तेर्दृष्टांतो विषमो निदर्शनं ॥१७॥ अविद्यायाः पुनरनुद्भवसाधनफलमा-
ह ॥ ॥ न चेद्भूयः प्रसूयेत कर्त्ता भोक्तेति धीः कथं । सदस्मीति च विज्ञाने तस्माद्विद्यासहायिका ॥१८॥ टीका ॥ न
१ ८ चेदिति पात्रेयणे । सदेव ब्रह्मैवाहमस्मीति विज्ञाने विशिष्टज्ञाने अपरोक्षानुभवे सति भूयः पश्चान्न चेदविद्या प्रसू-
येत कर्त्ता भोक्तेति धीः कर्माधिकारनिमित्तभूता कथं स्यान्न स्यादेवेत्यर्थः ॥ चकारः कर्तृत्वादेः पारमार्थिकत्वशंका-
निवृत्त्यर्थः ॥ कर्तृत्वादेः पारमार्थिकत्वे विद्यानिवर्त्यत्वायोगादनिर्मोक्षप्रसंग इति भावः ॥ ज्ञानकर्मसमुच्च-
यनिराकरणमुपसंहरति ॥ तस्मादिति ॥ यस्माद्विद्यायामुत्पन्नायां कर्मासंभवः सिद्धस्तस्मादसहायाकेवलै-
व विद्या कैवल्यहेतुरित्यर्थः ॥१८॥ विद्यायाः सहकारिनिरपेक्षत्वेनैव मोक्षहेतुत्वमिति युक्त्योक्तेर्थे श्रौतलिंग- गौ
मुपोद्बलयति ॥ ॥ श्लोकः ॥ अत्यरेचयदिति ॥ अत्यरेचयदित्युक्तो न्यासः श्रुत्यात एव हि ॥ तैत्तिरीयोपनिष- ड.
त्सु सत्यं परं परं सत्यमित्युपक्रम्य सत्यतप आदिमानसांतानि कर्माणि श्रेयःसाधनत्वेन निर्दिश्य तानि वा ए-
तान्यवराणि तपांसीति तेषां फल्गुफलत्वेन निंदामभिधाय न्यास इति ब्रह्मेत्युक्तो न्यास एवात्यरेचयदिति त-
त्त्वज्ञानांतरंगभूतः संन्यासः स्तूयते तस्मान्निंदितस्यानुपादेयत्वात्स्तुतस्य चोपादेयत्वात्कर्मसापेक्षत्वे मोक्ष-
स्य संन्यासविधानानुपपत्तेः संन्यासमात्रज्ञानमेव मोक्षसाधनं गम्यत इत्यर्थः ॥ अत एव हीति ज्ञानस्य
स्वफले कर्मनिरपेक्षत्वादेवेत्यर्थः [illegible] ने वाजिनां ॥ अमृतत्वं राम १

श्लो०

श्रुतं तस्मात्त्याज्यं कर्म मुमुक्षुभिः ॥ ११ ॥ एतावदिति वाजिनाममृतत्वं श्रुतमिति ॥ वाजसनेयिनामुपनिषत्सु
आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितमित्युपक्रम्याद्वयमात्मतत्त्वं दुन्दुभ्यादिदृष्टांतप्रबंधेनो
पपाद्योक्तानुज्ञा सन्नासि मैत्रेय्येतावदरे खल्वमृतत्वमिति ज्ञानस्यैवामृतत्वसाधनत्वावधारणं श्रुतं तस्य
कर्मानपेक्षायां लिंगमन्यथैतावदरे इत्यवधारणार्थवचनानुपपत्तेरित्यर्थः ॥ अमृतत्वस्य तु नाशास्ति वि
10 त्तेनेति च तत्रोक्तं वित्तसाध्यस्य कर्मणोऽमृतत्वसाधनत्वाभावे लिंगमनुसंधेयं ॥ न च विद्यां चाविद्यां चेति समु
च्चयविधानविरोधः ॥ तस्य देवतोपासनज्ञानकर्मसमुच्चयत्वात् यथा हिरण्मयेन पात्रेणेत्यनेन नय सुपथेति
च मार्गयाचनाद्यनुपपत्तेरिति सर्वमनवद्यं ॥ न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः ॥ त्याग एव
हि सर्वेषां मोक्षसाधनमुत्तमं ॥ त्यज्यते यदि न तज्ज्ञेयं त्यक्तुः प्रत्यक्परं पदमित्याद्याः श्रुत्याद्यस्मात्त्यागो
पलक्षितमात्मज्ञानमेव मुक्तिसाधनं तस्मादिति । प्रकृतार्थमुपसंहरति । तस्मात्त्याज्यं कर्म मुमुक्षुभिः ॥ सा
धनचतुष्टयसंपन्नैरात्मतत्त्वजिज्ञासुभिरित्यर्थः ॥ विविदिषोरपि नास्ति कर्मावसरः कुतो विदुषो इत्यभि
प्रायः अत्रार्द्धश्लोकोऽधिकः प्रागुक्तार्धिकार्द्धेन संख्येयः ॥ ११ ॥ तदेवं मुमुक्षुणा सर्वकर्मसंन्यासपूर्वकं ज्ञा
नानिष्टे न भवति आमातिस्यादेनोपपाद्येदानीं प्रोक्तं दृष्टांतमनूद्य दूषयति ॥ अग्निष्टोमवदित्युक्तं तत्रेदम
भिधीयते ॥ २० ॥ अग्निष्टोमवदिति ॥ अर्द्धश्लोकेन दूषणमुक्तं तैः इति प्रतिज्ञाय श्लोकेन दूषणमाह ॥ श्लोकः ॥

पाः

उपे॰स॰ नैककारकसाध्यत्वात्फलान्यत्वाच्चकर्म[illegible]॥विद्यानहिपरीनातोदृष्टांतोविषमोभवेत्॥२०॥नैकेति॥कर्म
१० णोग्निष्टोमादेरनेककारकसंध्यत्वान्निय नद्रव्यमंत्रतंत्रप्रयोगसाध्यत्वादितियावत्॥तथाफलान्यत्वा
त्फलभेदत्वाच्चदेवविद्य याकरोतिश्रद्धयोपनिषदा तदेववीर्यवत्तरंभवतीतिश्रुतेर्विद्याद्वारावीर्यवत्तरफ
युक्ता लविशेषसंभवाच्चसहकार्यपेक्षेत्यर्थः॥नैवंविद्यायाइत्याह॥विद्येति॥नहिपरीनाकर्मस्वभावापिपरीनः
स्वभावेतियावत्॥यथावस्त्वधीनप्रमाणनिबंधनायानिरतिशयमोक्षैकफलायाविद्यायानसहकार्यपेक्षा
प्रल युक्तेत्यर्थः॥यतएवंस्वभावभेदःकर्मविद्ययोरतोग्निष्टोमदृष्टांतोविषमोसादृश्यात्निकानुरूपोभवेदित्यर्थः॥२०॥
वैषम्यमेवोपपादयति॥कृष्यादिवदिति॥ ॥श्लोक॥कृष्यादिवत्फलार्थित्वादन्यकर्मोपबृंहणं॥अग्निष्टोम
स्त्वपेक्षेतविद्यान्यात्किमपेक्षते॥२१॥अग्निष्टोमःसातिशयःसाध्यफलार्थत्वादन्यकर्मोपबृंहणमन्यैःकर्म
भिःसहकारिभिर्विहितोङ्गीथाद्यंगसंश्रितोपासनादिरूपैरुपचयमपेक्षतेनियोजनानत्र दृष्टांतःकृष्यादि
वदिति॥कृषिवाणिज्यादेहिफलोपचयार्थंसाधनविशेषोपचयःप्रसिद्धइत्यर्थः॥विद्यातुनिरतिशयफल
त्वादन्यसहकारिभूतंकिंवस्त्वपेक्षतेनकिमपीत्यर्थः॥२२॥यदुक्तमकुर्वन्विहितंकर्मनिप्रत्यवायस्तन्ने
श्यतेतिनेत्याह॥ ॥श्लोक॥प्रत्यवायस्तुतस्यैवयस्याहंकारइष्यते॥अहंकारफलार्थित्वेवि[illegible]द्येतेनात्मवेदि हं
नः॥२३॥प्रत्यवायस्त्विति॥अस्यकर्मणोहंकर्ताएतत्फलंभोक्ष्यइतियस्याहंकारइष्यतेइष्टोभवति॥ राम॰

स्वाभाविकोवर्ततइति यावत्तस्याधिकृतस्याविहिताकरणेप्रत्यवायोभवेदित्यर्थः॥आसवेदिनः आसन स्वज्ञान
अ निरस्यर्थं हंकारफलार्थित्वेनविद्येनेविषयाभावादतोनिमित्ताभावान्नप्रत्यवायस्तस्येत्यर्थः॥विद्येवाज्ञानहानाय २२
नकर्मप्रतिकूलत्वइत्युपक्रमस्यपनागंथेनकर्मणःस्वातंत्र्येणवाज्ञानसहकारित्वेनवासर्वथानसाक्षान्मोक्षहेतुत्व
मस्तीत्युपपाद्यब्रह्मविद्यामथेदानींवक्तुंवेदःप्रचक्रमे इतिपरमप्रकृतमुपसंहरति॥ ॥तस्मादज्ञानहानाय संसा
रविनिवृत्तये॥ब्रह्मविद्याविधानायप्रारब्धोपनिषत्त्वियं॥२४॥टीका॥तस्मादिति॥विद्यायाः कर्मनिरपेक्षित्व
नदुक्तार्थः॥अज्ञानहानाया नाद्यज्ञाननिरासासिद्ध्येपेक्षितब्रह्मविद्याविधातुंसंपादयितुमिमंपरोपनिषदिदं
नभागः प्रारब्धेतियोजना॥अज्ञानहानस्यविशेषणंसंसारविनिवृत्तयइतिसंसारस्यविनिवृत्तिः सम्यङ्निवृत्ति
र्यस्मादितिविग्रहः॥अत्रश्रीवत्समार्षे अत्रोपनिषच्छब्दः लक्षणयावेदांतग्रंथेषुप्रयुक्तः॥२४॥नहिकोप्यमुख्यो
व र्थइतिदिक्षायां ब्रह्मविद्यायांशब्दसामर्थ्यंदर्शयन्नुपनिषच्छब्दप्रसादनेनापिस्वतन्त्रैववविद्यामोक्षहेतुरिति ष
सूचयति॥ ॥श्लोक॥सदेरुपनिपूर्वस्यक्विपिचोपनिषद्भवेत्॥मंदीकरणभावाच्चगर्भादेःशातनात्तथा॥२५॥
इतिचैतन्यप्रकरणं॥सदेरिति॥षद्लृविशरणगत्यवसादनेष्विति धातोरुपनीत्युपसर्गद्वयपूर्वकस्यक्विप्प्रत्ययांत ५ ज
स्योपनिषदितिरूपं अस्यचधात्वर्थत्रयंतथाहियेब्रह्मविदस्तेषांगर्भजन्मादिकमुपनिषादनाच्छिथिलीकरो
तीत्युपनिषद् त्येकोर्थः॥जिज्ञासोश्चोपसमीपेनिश्चयेनब्रह्मगमयतीतिद्वितीयः॥तत्त्वविदांतुगर्भादिनाशयेत

२२ धेनित्कलीयः॥एवंसम्यक्धात्वर्थयोगान्नाविद्यैवोपनिषच्छब्दवाच्यातदर्थार्थ्योऽप्युपनिषदुच्यते।तंगतं
जीवन्मुक्तिमितिवादित्यर्थः॥२५॥इत्युपोद्घातप्रकरणंप्रथमंविवृतंचैतत्प्रकरणमितिटीकान्तरे॥तदेवंमुमुक्षो ॥१॥
र्मोक्षसाधनब्रह्मात्मविद्याप्रतिपत्तयेवेदान्तारंभउपपद्यतइतिस्थितेपुनराशंक्यते॥ननुविद्योदयायवेदां
वि तारंभस्तदोपपद्यतेयदिविद्योदयःसंभाव्येतसइहात्मनिसंसारित्वग्राहकप्रत्यक्षादिविरोधाद्वाक्यशतेना
पिनोत्पादयितुंशक्यतेअसंजातविरोधितयाप्रत्यक्षादेर्बलवत्त्वात्तदुपजीवनश्चागमस्यदुर्बलत्वात्कथं वे
विदुषस्तापिविद्यायदिप्रमाणजातिसंसारंबाधेतनहिप्रत्यगात्मनोपिब्रह्मरूपत्वंकथंप्रत्यक्षानुभवोनवा
धेतेतिप्रत्युत्तरंवदति॥प्रतिषेद्धुमशक्यत्वान्नेतिनेतीतिशेषितं॥इदंनाहमिदंनाहमित्यद्धाप्रतिपद्यते॥१॥
नेति प्रतिषेद्धुमशक्यत्वादिना॥नेतिनेतीतिवीप्सयायासकलद्वयप्रतिषेधशेषितमुर्वरितंतंयदात्मतत्त्वंप्रतिषे
धावधित्वेनप्रतिषेद्धुःस्वरूपत्वेनप्रतिषेधसाक्षितयाजगत्स्थितंयतोऽतः।प्रतिषे[illegible]द्धुमशक्यत्वात
द्धासाक्षात्प्रतिपद्यतेनिःसंदिग्धमुपलभ्यतइतियोजना॥उपलंभप्रकारमभिनयति॥इदमिति॥इदं
देहरूपंनाहमात्मेदमिन्द्रियजातंमनोबुद्धिप्राणतदुपादानंचेतनपर्यन्तंनाहंकिंतेषांप्रकाशकोऽहमभि के
चारिस्वयंप्रकाशःकूटस्थःनस्पर्शोऽस्मिन्सर्वेजगदाभासेप्राकृतंकाशआनन्दश्चानन्तश्चनदेवोहंपरम
मक्षरात्मानंप्रतिपद्य[illegible]तेत्यर्थः॥अनेनविधानोद्देशोल्लेखपौनरुक्त्यशंकानिराकृता॥प्रतिषेद्धुमशक्य रामः ३२

त्वादित्यनेननु यथाथ्या त्व्यात्तेनबाधा योग्यत्वंदार्शनमितिविवेकव्यं ॥३॥ नन्वहंत्रं होनिज्ञानमुक्तविधेर्यो स

त्रमापिनभातिष्ठांतु भुंनेदेहेंद्रियाद्यभिमानस्यानवरत्तमनुवृत्तेरित्याशंक्यतस्यप्रमाणमूलत्वाभावाद्बा

स्वा भौ सं सं धितानुवृत्तिमात्रस्वभावत्वं लोज्ञवि ध्याप्रतिपक्षत्वमित्यभिप्रेत्य वाक्योत्थज्ञानस्य प्राबल्यमुपपादयति ॥

श्लोक ॥ इदंधीरिदमात्मोत्थावाचारंभणगोचरा ॥ निषिद्धात्मोद्भवत्वात्सा पुनर्मानं नात्रजेत् ॥२॥ टीका ॥ इदंधी

रिति ॥ देहादौ नात्मन्यात्मबुद्धिरिदंधीरित्युच्यते साहंकर्तुरिदमंशात्सूक्ष्मपूर्वाहंकारवासनावासितांतःकर

२ णरूपादिदमात्मनः संकाशादुत्थिता थ्यासात्मिकेत्यर्थः ॥ स्वरूपतोप्यस्यादौर्बल्यं मुक्ताविषंभेदादपितदाह प

वाचारंभणगोचरेति ॥ निरूप्यमाणे स्वतःसत्ताहीनमपियदपरोक्षव्यवहारगोचरतयागम्यते तद्वाचारंभण

ज मनृतेंद्रजालरूपं तदेवगोचरो विषयो यस्याः सा तथा यतस्तन्मनोनेति नेतीति शास्त्रेणनिषिद्धो बाधित आत्मा निः ए

च स्वरूपमुद्भवःकारणं यस्याः सा निषिद्धात्मोद्भवा तस्या भावो निषिद्धात्मोद्भवत्वं तस्मादिति विग्रहः ॥ सा पु

नरिदंधीरात्मयाथात्म्यज्ञानोत्तरं मानतां प्रमाणत्वं नव्रजेन्नैतिभेदवस्तुत्वाद वस्तुजत्वादवस्तुविषयत्वाच्चा

स्वभावस्याविशेषज्ञानवदित्यर्थः ॥ अतोवाक्योत्थमेवज्ञानं प्रबलं नेतरदिति भावः ॥२॥ इदानींपोषोपपत्ति

केर वैदौर्बल्यं प्रकृतिवादिनिं न्यायेन प्रथमोत्पन्नाया अपि कर्तृभोक्त्रित्यादिधियं अंतरेण ब्रह्मात्मज्ञानेन काये

बाध्यत्वमुपपादयति ॥ पूर्वबुद्धिमबाधित्वा नोत्तराजायते मतिः ॥ दृष्टिरेकः स्वयंसिद्धः फलत्वान्न स

संभव ॥ श्लोक ॥

उदे०स० नबाध्यते॥३॥ ॥का॥पूर्वबुद्धिभिति॥नहिश्रुत्युत्पन्नज्ञानजन्मांतरजमनुष्यमबाधित्वा॥किंधीन्तरोस
१२ य्यनेएवंकर्त्रादिबुद्धिमबाधित्वानात्मतत्त्वज्ञानमुत्पद्यतेॐ नःप्रसक्तप्रतिषेधात्मकत्वात्पूर्वस्य
पूर्वसमयवर्तनस्यसत्यभावाच्चपूर्वेणोत्तरस्यबाधः किंतुपरेणपूर्वस्यप्रसक्तस्यबाधइत्यनवद्यं॥प
दार्थबोधेशब्दस्यपूर्वसमयवर्तनरूपसत्यभावेमानांतरसापेक्षत्वेपि॥नवाक्यार्थबोधेतदपेक्षापदा
र्थबोधेपिव्यवहारमात्रसेवापेक्षणात्पूर्वबुद्धेर्व्यवहारांगत्वांशस्योत्तरेणात्मज्ञानेनाबाधमात्रेणोप
जीव्यविरोधश्चेतिद्रष्टव्यं॥किंचोपनिषदात्मज्ञानमेवतत्त्वावेदकमस्यंनाबाध्यार्थत्वादित्याह॥दृशिरि
ति॥ब्रह्मात्माकारांतःकरणवृत्तिप्रतिफलितापरोक्षस्फूर्तिर्दृशिरित्युच्यते॥सचैकःपरभावेनोपलक्षि
तोहितौयइतिथापितत्त्वमसि इःपरानपेक्षःस्वतःस्फूर्तिकःसन्नबाध्यतेउक्तौविशेषणेबोधयोग्यत्वा
वगमौस्फलत्वाच्चनहिफलंबाध्यते॥तस्यसर्वज्ञानसाधारणत्वात्सर्वव्यवहारहेतुप्रकाशात्मत्वाच्चेत्यर्थः॥नि
त्यासि इत्यात्मस्यफलत्वंविषयाकारवृत्तिव्यक्तत्वापेक्षयोपचर्यतइतिभावः॥३॥एवंब्रह्मात्मज्ञानस
वाक्यादनुत्पत्तिशंकामुत्पन्नस्यचप्राबल्योपपादनेनपूर्वप्रवृत्तप्रत्यक्षादिभिर्बाध्यार्थत्वशंकांचोन्म
उपदेशस थ्येदानींकथमिदमुत्पद्यतामितिवीक्षायांपदार्थपरिशोधनेनोत्तिभीतदृष्टांतेनोपपादयति॥ ॥श्लोकः॥
इदंवनमितिकल्प्यशोकमोहादिदूषितं॥वनादूरांतरकोथदत्तस्वात्मानंप्रतिपद्यते॥४॥इतिप्रतिषेधप्रकरणं॥ रांम १२
॥२॥

इदं वनमिति ॥ इदं शरीरमेव वनमिव वनं रागद्वेषशोकमोहादिभिर्व्याघ्रतस्करादिस्थानीयैर्दूषितमाक्रांत
मतिक्रम्य दक्षात्स आचार्याद्दृग्दृश्यान्वयव्यतिरेकालोचनया पदार्थशोधनेन देहादिकमनात्मभूतं तं त्यक्त्वा या
स्वमात्मानं सर्वानुस्यूतमनपोह्यं प्रपद्यते इदं ब्रह्मास्मीत्यौपनिषदं पुरुषमवगच्छतीत्यर्थः॥ यथा गांधारको गंधारदे
शवासी पुरुषो बद्धचक्षुरेव तस्करैरानीय महावने निक्षिप्तः स बंधमोक्षार्थी तत्राक्रोशं कुर्वन् केनचित्कारुणि
केनोप लब्धस्तेन मोचितबंधो दर्शितस्वदेशमार्गो ग्रामाद्ग्रामं पृच्छन् पंडितो मेधावी तान्स्वदेशं प्रतिपद्यते
तथायमपि संसारी अविद्यारागादितस्करैर्मिथ्याज्ञानपटेन विवेकदृष्टिमाच्छाद्य स्वदेशाद्देहारण्यं प्रवेशितो
बंधमोक्षार्थी। कदाचित्केनचित्कारुणिकेनाचार्येण ब्रह्मविदा व्याजितमिथ्यादृष्टिपटः प्रतिबोधितस्वदेश
ब्रह्ममार्गोऽन्वयव्यतिरेकाभ्यां स्वयमूहमानः स्वमात्मानमधिगच्छतीत्यर्थः॥ ४॥ आत्मज्ञोत्पत्तिविधिप्रकरणं॥ गो
द्वितीयं विवृतं प्रतिषेधप्रकरणं ॥ २॥ ॥ येयं ब्रह्मविद्या प्रतिपादिता तस्यां प्रकाशमानं ब्रह्म किं प्रत्यगा
त्मनो भेदेन प्रत्येतव्यमभेदेन वेति॥ द्वा सुपर्णा सयुजेत्यत्र भेदश्रवणादयमात्मा ब्रह्मेत्यभेदश्रवणाच्च संदेहे
य १ निर्णयकारिणीं श्रौतं दृष्टार्थवाक्यविशेषमर्थं स्पष्टयति॥ ॥ श्लोक॥ ईश्वरश्चेदनात्मा स्यान्नासावस्मीति धारयेत्॥
आत्मा चेदीश्वरोऽस्मीति विद्या सान्यनिवर्तिका॥ १॥ टीका॥ ईश्वर इत्यादिना॥ ईश्वरो जगत्कारणत्वेनोपलक्षितः
परमात्मा सत्यज्ञानानंतानंदरूपः स चेदात्मभिन्नो मेर्वादिवद्विषयभूतः परोक्षो वा स्यात्तदा असावीश्वरोऽहमस्मी

वचनविरोधः स्यादतो लिंगुपगछं तिग्राह्यमिति चेत् न्यायविरोधः स्या १

उप० स० मुमुक्षुर्न धारयेदात्मानं तत्त्वतो न प्रतिपद्येत न तत्त्वमस्यादेरित्यर्थः॥ईश्वर एव आत्माहमस्मि न अन्य इति चेद्वा
१३ स्यादि ज्ञानीयात्तदा न श्रुतिन्यायविरोध इति योज्यं॥साविद्यानिरोहितभेदाकारस्य ब्रह्मैकावलम्बिनी अन्यस्या अ
विद्याया निवर्त्तिका समूलसंसारनिवर्त्तिकेत्यर्थः॥अथ ब्रह्मवेद ब्रह्मैव भवति ब्रह्मैव सन् ब्रह्माप्येतीति श्रुतौ ब्रह्मज्ञान ता
स्य ब्रह्मभावफलश्रवणादन्यत्वपक्षे स्थितस्य नष्टस्य वान्यस्यान्यथाभावानुपपत्तेरैक्यज्ञानमेव फलवदिति।
तन्नैव शास्त्रतात्पर्यं न भेदे तज्ज्ञानस्याफलत्वादन्योसावन्योहमस्मीति न स वेदेति भेददर्शनस्य निंदितत्वाच्च
श्रुतेस्त्वनाद्यविद्याकल्पितभेदानुवादपरत्वान्न स्वार्थे तात्पर्यमिति भावः॥७॥इतश्चाभेदे वेदतात्पर्यमित्याह॥
श्लोक॥आत्मनोन्यस्य चेद्धर्मा अस्थूलत्वादयो मताः॥अज्ञेयत्वे स्यात्किं तैः स्यादात्मत्वे ह्यन्यधीर्हुतिः॥२॥आ
स्वदि त्मन इति॥अस्थूलत्वादयो धर्माः प्रत्यगात्मनोन्यस्मिन्नीश्वरस्य चेन्मता इष्टाः स्युः तदास्येश्वरस्यानात्मभूतत्वाद
ज्ञेयत्वे सति मुमुक्षोरस्थूलत्वादिभिः श्रौतैर्धर्मैः किं स्यान्न किमपि स्थूलोहं कृशोहमित्यादिस्वगतभ्रांतेर्निवृ
त्तेरित्यर्थः॥यदात्वस्थूलत्वादिधर्मक ईश्वरोहमस्मीति ज्ञायते तदा तस्यात्मत्वे सति भ[illegible]ती चान्यधीर्हुतिः॥
स्वात्मन्येव गृहीतायाः॥कृशस्थूलत्वादिधियो मोहभूताया बाधसिद्धिः फलं स्यादित्यर्थः॥२॥कस्मिन्न्वाका
काश ओतश्च प्रोतश्चेति कार्यकारणात्मकजगदाश्रयत्वेनोक्तस्याक्षरस्योपक्रमादेतस्य वा अक्षरस्य प्र
शासने गा[illegible]र्गि इति जगदीश्वरत्वेन यामध्ये परामर्शाद् दृष्टं द्रष्टृत्यादिना नस्वभावकथनपूर्वकमंते चै राम २३

तस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चेत्युपसंहारात् ईश्वरपरता ब्राह्मणवाक्यस्याशेषस्य यथाः
ता न तत्र नान्यदतोस्ति द्रष्टृ श्रोतृ मंतृ विज्ञातृ इति च द्रष्टृत्वाद्युपलक्षितस्य प्रत्यगात्मनोऽक्षरब्रह्माभेदैवं यथा रितेई श्व
ति ईश्वरात्मनोरभेद एव शास्त्रार्थो यतस्तस्मात्प्रत्यगात्मन्यध्यस्तस्थूलत्वादिप्रतिषेधपरमिदं वाक्यमास्थे
मे यमित्याशंक्याह ॥ ॥श्लोक॥ मिथ्याध्यासनिषेधार्थं ततोऽस्थूलादि गृह्यतां ॥ परत्र चेन्निषेधार्थं शून्यतावर्णः
नं हि तत् ॥२॥ टीका ॥ मिथ्येति ॥ ततस्तस्मात् मिथ्याध्यासस्याज्ञानमूलस्य निषेधार्थं निरसनार्थं अस्थूलादिप्र
त्यगात्मविशेषणत्वेन गृह्यतां ॥ विपक्षे दोषमाह ॥ परत्रेति ॥ अस्थूलादिवाक्यं परत्र प्रत्यगात्मनोऽन्यत्र स्थू
14 लत्वादिनिषेधार्थं चेत् स्यात्तदा हि निश्चितं शून्यतावर्णनमेव तत् स्यात् आत्मनोऽन्यस्य जडत्वात्तेन च स्थौल्यादिधर्म दि स
योगात् निषेधस्य तः प्राप्तत्वे सति ईश्वरस्येश्वरत्वायोगात् निषेधमात्रपरमेव वाक्यं स्यादित्यर्थः ॥ तस्मादस्थूलत्वादि
धर्मकस्यानात्मत्वायोगात् ईश्वरमभ्युपगच्छता सेवस्यात्मत्वमुपगंतव्यम् इति भावः ॥२॥ किं च प्रत्यगात्मनोऽन्य
त्रस्थूलत्वादिप्रतिषेधे त्वाभासप्रतिषेधोक्तेर्निर्लब्धापद्येतेति दोषांतरमाह ॥ ॥श्लोक॥ बुभुत्सोर्यदि चा
न्यत्र प्रत्यगात्मन ईष्यते ॥ अप्राणो ह्यमनाः शुभ्र इति चानर्थकं वचः ॥३॥ टीका ॥ इतीश्वरप्रकरणं तृती
यं ॥३॥ टीका ॥ बुभुत्सोरिति ॥ यदि प्रत्यगात्मनो बुभुत्सोरात्मतत्त्वं बोद्धुमिच्छोः संसारित्वेनाभिमतादात्मन इ
ति यावत् अन्यस्मिन् देहाद्वैप्राणमनस्त्वादिधर्मनिषेधः इष्यते तदा अप्राण इत्यादिवचनमनर्थकं निर्विषयं स्यात् अत्र

उप.स. प्राणादिप्रसक्त्यभावात्प्रतिषेधस्य च दृष्टार्थत्वादित्यर्थः ॥४॥ इतीश्वरात्मप्रकरणं तृतीयं विवृतं ॥३॥ श्री ॥ ननु
१४ यदि दृगीश्वराभेदेनात्मनो ज्ञानं मोक्षसाधनमुक्तं तन्नोपपद्यते संचितानेककर्मसद्भावात् कर्मणां च फलोपभोगैकभा
वनियमात्प्रतिबंधसंभवादिति तत्राह ॥ ॥श्लोक॥ अहंप्रत्ययबीजं यदहंप्रत्ययवासितं ॥ नाहंप्रत्ययवत्प्लुष्टं कथं कर्म यं नु
प्ररोहति ॥२॥ टीका ॥ अहमिति प्रत्ययोऽहंकारोऽनात्मन्यात्माभिमानलक्षणः स बीजं कारणं यस्य कर्मणस्तदहंप्रत्यय
बीजं। अहमिति प्रतीयत आत्मा यस्मिन्नंतःकरणे साभासे तदहंप्रत्ययवत्तस्मिन्नहंप्रत्ययवति स्थितं संचितं यत्क
त र्मजातं तत्राहंकर्ता भोक्ता किंतु ब्रह्मैवाहमस्मीति यः प्रे[...]ण जनितः प्रत्ययः स एव वन्हिस्तेनोप्लुष्टं दग्धं कथं पुनः प्रो ना
हति फलोन्मुखं जायते तेनेति योजना ॥ तथा च श्रुतिस्मृ[...]तीक्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे ॥ ज्ञानाग्निः
सर्वकर्माणि भस्मसात्कुरुते तथेति ॥ ज्ञानोदये नांतरीयकत ॥ या मूलाज्ञानस्य विरोधादेव निवृत्तिसंभवात्
तदात्कार्यांतःकरणस्यापि निवृत्तेराश्रयाभावे कर्मस्थित्ययोगात् कुतस्तेन मोक्षप्रतिबंधशंकेति अ
॥१॥ भिप्रायः ॥ ननु यथा ज्ञानवतोपि भिक्षाटनादिकर्म सफलमुपलभ्यते तथा तस्यादृष्टफलमपि कर्म सफ
लं स्यादिति कल्प्यते इति शंकते ॥ ॥श्लोक॥ दृष्टवच्चेत्प्ररोहः स्यात्तन्नान्यकर्मासहत्वतः ॥ तन्निरोधे कथं चेत्स्या
त्स्वेच्छामोवस्तुदृष्टतः ॥२॥ टीका ॥ दृष्टवच्चेत्प्ररोहः स्यादिति ॥ परिहरति नान्यकर्मासहत्वत इति तेन तन्निषेधार्थः
सभिक्षाटनादिर्विदुषो व्यापारोऽभिकर्मा अन्यतः प्रवृत्तफलं कर्म कारणं यस्य[...]सोन्यकर्मा इत्यर्थस्तेन रामश्च

नाविरोधि प्रारब्धफलकर्मनिबंधनं हि भिक्षाटनादिनैवं विधिलक्षणं तस्य ज्ञानविरोधित्वादित्यर्थः॥ ननु ज्ञानाद्ज्ञा
ननिवृ... स्यात् तन्मूलाहंकारनिवृत्तिद्वारेण तदाश्रय कर्मनिवृत्तौ कथमारब्ध... कर्मसिद्धेर्यथाविभिन्नाविदुषो भिक्षाट
नादिकर्मप्रवृत्तिरिति पृच्छति पूर्ववाद्यौ तन्निरोधइति। कर्माश्रयः प्रथमतेव्यार्थः कर्मद्वितीयतत्कृत्वार्थः॥ उत्तरमाह॥ दे २॥श्लोक॥
देहाद्यारंभसामर्थ्यात् ज्ञानं माद्विषयं त्वयि॥ अभिभूय फलं कुर्यात् कर्मानेज्ञानमुद्भवेत्॥ ३॥ टीका॥ देहादिति॥ सद्विषयं
प्रमाणजनितत्वेन तत्प्रबलमपि ब्रह्मात्मविषयं ज्ञानेमभिभूय विदेहकैवल्यरूपात्फलात् प्रच्याव्य कर्म प्रारब्धफललक्षणं
स्वफलं देहाभास जगदाभासरूपं त्वयि ज्ञानवत्यपि कुर्यादेव कुतः देहाद्यारंभं प्रतिसमर्थत्वा दंते प्रारब्धकर्मफलभोगाव
साने सति ज्ञानं प्रतिबंधरहितं समुत्पत्तेरुद्भूतं भवति वर्त्तमानकार्यं संपादकाविद्यालेशमप्यपबाध्याविद्यां संसारायेस्थापय
15 तीत्यर्थः॥ ३॥ ननु प्रारब्धकर्मवशाद्ज्ञानिनोपि भोगः स्यात्तत्वनारब्धकर्मतत्फलयोस्तस्मिन्नवस्थितिरिति कथमुपपद्ये
त अज्ञानकार्यत्वाविशेषात्सर्वस्य॥ अज्ञाननिवृत्तौ च पुनराश्रयाभावेनावस्थाभावस्य समत्वादित्याशंक्याविशेषमाह॥ नी
श्लोक॥ आरब्धस्य फलेह्येतेभोगो ज्ञानं च कर्मणः॥ अविरोधस्तयोर्युक्तो वैधर्म्यं चेतरस्य तु॥ ४॥ टीका॥ आरब्धस्येति
ति॥ भोगो ज्ञानं चैते हि यस्मादारब्धस्य कर्मणः फले तस्तयोरविरोधो युक्तः इतरस्य त्वनारब्धफलस्य संचितस्य
क्रियमाणस्य वा कर्मणो वैधर्म्यं वैपरीत्यं विरोध एवेत्यक्षरार्थः॥ अयं भावः॥ ज्ञानं हि स्वकारणाज्जायमानं शरी
रादिसापेक्षमेव जायते अशरीरस्यागंतुकज्ञानासंभवात् शरीरादिकं तु न ज्ञानकारणादुत्पद्यते अपि तु कारणस्या

उप.स. स्यहेतुत्वायोगात् ततः कैश्चित्कर्मविशेषैः शरीरविशेषे ज्ञानोत्पत्तियोग्ये स्वफलदानायारब्धे सति तमाश्रित्य ज्ञान
१९ हेतुकर्माणि ज्ञानमारभंते इत्यभ्युपगंतव्यं तथा चारब्धे देहे तद्भोगस्यावश्यंभावित्वाद्भोगप्रदकर्मारब्धशरीरमा
श्रित्य स्वहेतुसमासादितं ज्ञानं स्वफलमज्ञाननिवृत्तिं कुर्वदपि न तस्य भोगे क आश्रय देहारंभकर्माक्षिप्ताविद्याले क
शं निवर्तयितुमुपजीव्यविरोधित्वाभावादिति नारब्धफलकर्मज्ञानयोर्विरोधः अनारब्धफलानां तु कर्मणामकर्तात्म
मा मतत्त्वज्ञानोदये विरोधादेव कर्तृस्वभावनिवृत्तावाश्रयोदयो वोपपन्नेः ज्ञानेन सहावस्थानमुपपद्यत इत्यस्ति विशेष इ भावा
ति॥४॥ ननु ज्ञानिनोऽपि चेद्भोगे देहारंभककर्मनिबंधनोऽस्ति तर्हि तस्य कदाचिद्देहाभिमानसंभवात् दुष्कृतदुरित
प्रतिबंधवशान्मोक्षानुपपत्तिरिति चेत्तत्राह॥ ॥श्लोक॥ देहात्मज्ञानवज्ज्ञानं देहात्मज्ञानबाधकं॥ आत्मन्येव भवे प्र
द्यस्य स नेच्छन्नपि मुच्यते॥५॥ टीका॥ देहात्मज्ञानवदिति॥ यथाविवेकि...क्षणस्य लौकिकस्य देहे मनुष्यो
हमित्यात्मज्ञानं निःसंशयमुप लब्धं तथा मुख्यात्मन्येव देहाद्यहंकारपर्यंतसाक्षिणि आत्मन्येवस्य देहात्मज्ञान य.
बाधकमहमास्मि परं ब्रह्मेत्येवंरूपं निःसंदिग्धं ज्ञानं भवेत्स यथोक्तज्ञानबलादनर्थराशेर पनीततया सुतरामनिच्छ
न्नपि बलान्मुच्यत एवेत्यर्थः॥ तथा चाविर्भूतात्मतत्त्वस्य पुनर्देहाभिमानहेत्वभावान्न मोक्षे कोपि प्रतिबंध इति भावः॥
तथा श्रुतिः भिद्यते हृदयग्रंथिः छिद्यंते सर्वसंशयाः॥ क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे इत्याद्याः॥ तथा स्मृ
तः॥ योपि बीजान्यग्न्युपदग्धानि न रोहंति यथा पुनः॥ ज्ञानदग्धैस्तथा क्लेशैर्नात्मा संबध्यते पुनः॥ यथा पर्वतमादी राम १९
प्तं नाश्रयंति मृगद्विजाः॥ तद्वद्ब्रह्मविदो दोषा नाश्रयंति कदाचन॥ मंत्रौषधबलैर्यद्वज्जीर्यते भक्षितं विषं॥ तद्वः

सर्वाणिकर्माणिजीर्यंतेज्ञानेनेत्यक्षणादिति॥५॥ज्ञानिनःकर्मणाप्रतिबंधाभावमुपपादितमुपसंहरति॥॥
तुसर्धद्दि ततःसर्वमिदंसिद्धंप्रयोगोस्माभिरीरितः॥६॥इत्यहंप्रत्ययप्रकरणं॥ततइत्यर्धश्लोकेनसर्वमिदमिति॥प्रारब्ध
केनत्वो कर्माविरोधीतिकिंसिद्धंश्रुत्यादिप्रमाणासिद्धमित्यर्थः॥प्रयोगउपपत्तिः॥६॥तत्वज्ञानस्वभावप्रकरणंचतुर्थंवि
वृतं॥४॥अहंप्रत्ययप्रकरणमित्यन्यत्र॥७॥यदिप्राशुक्रीत्याब्रह्मात्मज्ञानममृतत्वंगमयेत्किमितितर्हिसर्वैरहंब्रह्मा
स्मीत्यात्मरूपेणगृह्यतेनिसर्गात्तदेषांपरमपुरुषार्थार्थित्वादितितत्राह॥ ॥श्लोक॥मूत्राशंकोयथोदंकोनाग्रहीदमृतं वसर्वे
यथा॥कर्मनाशभयाज्जंतोरात्मज्ञानाग्रहस्तथा॥१॥टीका॥ ॥मूत्राशंकाइति॥अत्रेयमाख्यायिकाउदंकोना
मकश्चिद्द्विजोभगवंतमहाविष्णुंतपसातोषयित्वादेवरक्षितममृतंप्रार्थितवान्॥ततोभगवतादेवेंद्रःप्रयुक्तममृतमस्मै म
16 दीयतामितिइंद्रस्तुविष्णोराज्ञांपालयन्नमृतकलशंनीत्वामातंगवेषमास्थायस्ववस्तिदेशेनंकलशमुपनिधायोदं
कायदातुमारेभे॥ऽस्ययामाभवत्वस्यामृतपानमितिमन्यमानस्तदुदंकोपिचंडालमूत्रशंकयानजग्राहेति॥उदंकोमू
त्राशंकःसन् [illegible] यथाभूतमेवप्रत्यक्षोपलब्धमप्यमृतंयथानागृहीन्मदभिलषितममृतमिदमितितंगृहीतवान्
जातिनाशभयादितियोजना॥तथाजंतोर्लोकस्यवर्णाश्रमोपाधिविहितकर्मनाशभयादात्मज्ञानस्ययथोक्तस्याग्र
र्ध ग्रहस्तस्मिन्ननादरेदृष्टांतेयोजनापदार्थस्वरूपापरिज्ञानंविपरीतज्ञानंचश्रुत्युक्तात्मस्वरूपाग्रहणकारणमितिभा
वः॥१॥ननुदृष्टांतेदेवेंद्रस्यवेषान्यत्वममृतकलशस्यचमूत्राशयस्थाननिवेशनंचजात्यंतरमूत्रभ्रमोत्पादनेनामृता

उप·स· ग्रहणकारणमासीन्नतथात्मनोब्रह्मभूतस्यभ्रमकारणमस्तीत्यतआह॥ ॥श्लोक॥बुद्धिस्थ[illegible]श्चलतीवात्मा
।१६॥ ध्यायतीवचदृश्यते॥नौगतस्ययथावृक्षास्तद्वत्संसारविभ्रमः॥२॥टीका॥बुद्धिस्थइति॥अनाद्यविद्ययात्मस्य
ध्यस्तबुद्धौलिंगशरीरेभिमानित्वेनास्थितआत्मातस्यांबुद्धौचलंत्यांचलतीवदृश्यतेनवस्तुतश्चलत्यविक्रियत्वात्
नथातस्यांध्यायंत्यांनिश्चलीभूतायांचध्यायतीवनिश्चेष्टइवदृश्यतेनतुतिभासतेनतुवस्तुतोध्यायतिचलनाभावेनस्व दे
तियोगिकस्यनैश्चल्यस्याप्यभावादित्यर्थः॥विकारवद्बुद्धिविवेकादात्मैवसंसार्यहमस्मीतिविपरीतनिश्चयदोषाद्बु ध्या न
द्ध्यादिभिरीर्यमाणमप्यात्मनोब्रह्मत्वेनगृह्णातिलोकइत्यभिप्रायः॥अविवेकादन्यथाप्रतिपत्तौदृष्टांतमाह॥नौगत
२ स्येति॥सद्दृष्टिनिदर्शनिकोक्तिः॥उक्तमेवप्रपंचयति॥ ॥श्लोक॥नौस्थस्यप्रातिलोम्येननगानांगमनंयथा॥आ
त्मनःसंसृतिस्तद्वद्ध्यायतीवेतिहिश्रुतिः॥३॥टीका॥नौस्थस्येति॥जलस्थायांचलंत्यांनाविस्थितस्यजनस्ययथानौ
गतिविपरीत्येनजलतीरस्थानांनगानांवृक्षादीनांगमनंविभासते॥उपाध्यविवेकात्तद्वत्संसारिणोप्यसं
नःसंसृतिरनुभूयतइत्यर्थः॥उक्तार्थानुवादिनीश्रुतिंपठतिध्यायतीवेतिहिश्रुतिरिति॥संसमानःसन्नुभौलोकावनुसं
३ चरतिध्यायतीवलेलायतीवेतिश्रूयतइत्यर्थः॥प्रपंचितदृष्टांतानुगुण्येनदार्ष्टांतिकंप्रपंचयन्नुदाहृतश्रुत्यर्थमाह॥श्लो॥
चैतन्यप्रतिबिंबेनव्याप्तोबोधोहिजायते॥बुद्धेःशब्दादिनिर्भासस्तेनमोमुह्यतेजगत्॥४॥टीका॥चैतन्यप्रतिबिंबे
नेति॥चैतन्यप्रतिबिंबश्चिदाभासस्तेनव्याप्तोहियस्माद्बुद्धेर्बोधोविषयाकारावृत्तिर्जायते॥अतःस्वाभासाविवे राम ३६

कालशब्दादिभिर्बुद्धिवृत्तिव्याप्यविषयैरित्थंभावेतृतीयाविषयभूतदेहाद्यात्मनाभासोभासनंस्फुरणमात्मनोभव
तीतिशेषः॥यद्विशब्दादिनिर्भासइतिपाठोलभ्यतेतदाबोधविशेषणंशब्दादेर्विषयस्यनिर्भासोयस्मिन्तथेति
सुगमं॥येनैवमेकस्यांबुद्धिवृत्तौदेहादिविषयचैतन्ययोःसंश्लेषइवभवतितेनान्योन्याविवेकनिमित्तेनजगज्जनोति
मो शयेनमुह्यतीत्यर्थः॥यथानौस्थःपुरुषोनावश्चलनंनानुभवति॥अचलेषुचवृक्षेषुचलनमनुभवति॥ [illegible]॥
[illegible]उपाधिसामर्थ्यादेवंबुद्धिस्थदेहाद्यात्मभावमिवापन्नआत्मातदीयंव्यापारंनपश्यन्[illegible]नुभव[illegible]
[illegible]ति॥तदाभासाविवेकात्तुचिदात्मनिविकारमारोपयन्ननुभवतिमृषैवेत्येनतत्ध्यायतीवेत्यादिश्रुतो
17 क्यतेअतउपाधिसामर्थ्यात्संसारित्वविभ्रमइत्यभिप्रायः॥४॥एवमविवेकाधीनेसंसाराध्यासेविविक्तपदार्थ
स्यवाक्यादहंब्रह्मास्मीतिबुद्धिवृत्त्युदयेमुक्तिःफलिष्यतःपदार्थविवेकवत्ताभाव्यंमुमुक्षुणेत्यभिप्रेत्याह॥ ॥
श्लोक॥चैतन्याभास्यताहमस्तादर्थ्यंचतदस्ययत्॥इदमंशप्रहाणेनपरःसोनुभवोभवेत्॥५॥ [illegible]॥इतिमू
र्द्धांकप्रकरणं॥टीका॥चैतन्यभास्यतेति॥अहमोंकारस्यचिदचिद्ग्रंथिरूपस्ययच्चैतन्यभास्यताऽस्यतायच्चे
तादर्थ्यंचिदात्मनोविषयोपस्थापकत्वेनतच्छेषत्वमस्तितदुभयमस्याहंकारस्यसंबंधितास्मिन्निदमंशस्यप्र
हाणेविवेकेसतिनभवेन्नस्यादितियोजना॥तत्रयोनुभवःसाक्षीपरिशेषःसपरःपरमात्मावाक्यार्थभूतो हं
भवेदित्यर्थः॥यद्वाअस्याहमोंकारस्यचैतन्यभास्यताजडतातादर्थ्यंचतच्छेषत्वंचयदस्मादस्तितत्तस्मादे

उप॰स॰ यमहंकारोनात्मेतिवेद्यांशप्रहाणेनतात्मिन्नस्मदर्थाभिमानत्यागेनयोनुभवः॥संपरआत्मेतिनिश्चयवानुभवे
१७ दितियोजना॥अथवासवाक्यार्थविषयःपरःसर्वोनरोनुभवोहमोहंकारस्येदमंशप्रहाणेनपृथक्करणेनभवे
दितिसंबंधः॥इदमनिदमात्मकस्याहंकारस्यसंबंधीयइदमंशस्तस्यसाक्षिसाक्ष्यान्वयव्यतिरेकागमापायित्व
दवधयन्वयअतिरेकालोकचनरूपेणमननेनापबाधेसतिअवशिष्टांशोनपोह्यआत्मेत्यनुभवोभवेदित्यर्थः॥
नन्वहमित्येवभासेइदमंशएवनचकास्तियस्यप्रहाणेनपरोनुभवोभवेदित्याशंकायामाह॥चैतन्याभास्य
तेतितादर्थ्येचेतिच॥सुषुप्त्यादावात्मनिभासमानेपिअहंकारस्यानवभासादनात्मत्वोनिश्चितेसतिजागरिता
दावागंतुकत्वाच्चैतन्याभास्यत्वात्तस्यासिद्धाअतःप्रतिभासनेइदमंशाभावेपिचैतन्याभास्यत्वेनलक्षणेनास्ती
दमाकारतेत्यर्थः॥तथ्यानादार्थ्यमप्यस्तिआत्मनिकर्तृत्वभोक्तृत्वादिव्यवहारनिर्वाहकतयाआत्मशेषत्वम
स्तियद्यस्मादेवंततस्मादस्यनात्मत्वलक्षणइदमंशोविद्यतेअतस्तत्प्रहाणेनप्रत्यगात्मानुभवोभवेदितिसं
वैसमंजसं॥५॥बुध्यपराधप्रकरणंपंचमंविवृतं॥मूत्राशौचप्रकरणमित्यन्यत्र॥पदार्थविवेकवतोवाक्यादहंब्रह्मे
तिविज्ञानंभवतीत्युक्तंतत्राह मित्यत्रेदमंशप्रहाणेनसाक्षित्वस्यशोधनप्रकारःसूक्ष्मोपायोनिर्दिष्टस्तेनास
मर्थंप्रतिस्थूलोपायेनपदार्थशोधनप्रकारमुपदेष्टुंप्रकरणमारभते॥नत्रोत्त्वस्वरूपप्रहाणमंतरेणहातुंनशक्यतेयः॥ य
थाग्नेरौष्ण्यंतस्यस्वरूपत्वादेवंविशेषणमात्मनोपितथापितथाविधस्यकश्चिद्विशेषणत्वमौहारःकश्चितभेदमाश्रित्ये राम १७

तिस्थिते आत्मनि सति सत्ताचैतन्यानंदानामनपायात्तेषां विशेषणत्वं किंतु स्वरूपत्वमेव ... कृशः।
स्थूलः कृष्णो गोरोहं मनुष्यः श्रोता द्रष्टा वक्ता कामी क्रोधी ज्ञानी कर्ता भोक्ता सुखी दुःखीत्येवंविधानि विशेषणानि नात्मनः
सत्तादिवत्स्वरूपभूतानि सत्यप्यात्मनि सुषुप्त्यादौ तेषामभावादित्येवमात्मनः पृथग्भूतस्य तस्य कूटस्थता वधेयेत्यभिप्रेत्य पृथ
शो ग्भूतस्य विशेषणत्वाभावे दृष्टान्तमाह॥ ॥श्लोक॥ छित्वा त्यक्तेन हस्तेन स्वयं नात्मा विशेष्यते। तथाशिष्टेन सर्वेण येन येन
विशेष्यते॥३॥ टीका॥ छित्वात्यक्तेनेति॥ यथा दृष्टान्तस्तथा येन येन मनुष्यत्वादिना विशेष्यते तेन सर्वेण त्विशिष्टेन त्यक्त।
हस्तातिरिक्तेन पादादिना वा स्वयमात्मा न विशेष्यते ... यथा हस्तच्छेदानंतरं हस्तवानहमिति न विशिष्टप्रत्ययः
क्रियते एवमेव पादादिमान् मनुष्योहमित्यादि विशिष्टप्रत्ययो न कार्य इत्यर्थः॥३॥ देहद्वयसम...धर्मा
णामात्मनि व्यभिचारात्तैरात्मा विशिष्यत इति ... इत्युक्तं अन्वयफलितमाह॥ ॥श्लोक॥ तस्मात्त्यक्तेन
प हस्तेन तुल्यं सर्वविशेषणं॥ अनात्मत्वेन तस्माज्ज्ञो मुक्तः सर्वविशेषणैः॥४॥ तस्मादिति॥ अनात्मत्वेन त्यक्ते
न हस्तेनोक्तसंबंधं विमानानि विशेषणानि नात्मस्वभावभूतानि विशेषणत्वात् छित्वा त्यक्तहस्तवदित्यर्थः॥
यस्मादेवं तस्मात् ज्ञो ज्ञानवान् विवेकज्ञानवान् सर्वविशेषणैर्मुक्तश्चित्सदानंदमात्रात्मक एवावशिष्यत इत्य
र्थः॥४॥ उक्तन्यायेन विशेषणानामनात्मत्वेपि नात्मनस्तद्वियोगोस्ति आगमापायाभ्यां संबंधनैरंतर्यादि
त्याशंक्याह॥ ॥श्लोक॥ विशेषणमिदं सर्वं साध्वलंकरणं यथा॥ अविद्याध्यासतः सर्वं ज्ञात आत्मन्यसद्भवेत्॥५॥

उप·स·
१८

टीका॥ विशेषण[illegible]मिति॥ इदं सर्वं विशेषणं यथालंकरणमलंकार्यसंबंधेपि न तत्ताद्रूप्यं तद्धर्मत्वबुद्धिविषयस्त
थासावपि शोभनं युक्तमिति यावत्॥ इतरथागमापायानुपपत्तेरित्यर्थः॥ तर्हि कुतो मनुष्योहमित्यादिना ताद्रूप्या
त भासस्तत्राह॥ अविद्याध्यासत इति॥ मोहादेव तथावभास इत्यर्थः॥ यस्मादविद्ययाध्यस्तमेवात्मनीदं सर्वं विशेष ण
मतो ज्ञाने आत्मन्यविद्यानिवृत्ता च सद्बाधितं कार्त्स्न्येप्यविमानं भवे न तथा निश्चितं भवेदिति योजना॥३॥ज्ञा च
ते आत्मनी युक्ते ज्ञेयत्वमात्मन उक्तमिति शंकांत॥ ज्ञेयत्वे च विशेषणादिवदनात्मत्वप्रसंगादित्याशंक्याह॥ ॥ स्या
श्लोक॥ ज्ञातैवात्मा सदा ग्राह्यो ज्ञेयमुत्सृज्य केवलः॥ अहमित्यपि यद्ग्राह्यं व्यपेतांगसमं हि तत्॥४॥ टीका॥ ज्ञातै
वेति॥ ज्ञेयमुत्सृज्य दृश्यांशापोहं कृत्वा यो ज्ञाता सदा सर्वस्य स एवात्मा ग्राह्यांश इति ग्राह्यो बोधव्य सेयः किंल
क्षणः केवलो ज्ञातृत्वविशेषणेनापि रहित इत्यर्थः॥ ज्ञातृत्वाद्युपलक्षितं चिन्मात्रमलुप्तप्रकाशस्वभावतया
सर्वानुस्यूतं वस्त्वात्मेति विवेकतो निश्चितमात्मयो भवेदिति भावः॥ अहमित्यनुभूयमानत्वात्कथं ज्ञातैवात्मेत्युच्य
त इत्यत आहाहमित्यपी[illegible]ति॥ यदपीदमहमिति ग्राह्यमाभासस्वरूपं प्रत्यक्षेतद्व्यपेतांगसमं छिन्नहस्तत्तु
ल्यं हि एव तत्सुषुप्त्यादावात्मन्यवभासमानेप्यहमित्यनवभासनादहंमोव्यभिचरित्वेन सत्यात्मदृश्यत्वयात्म
वायोगादित्यर्थः॥५॥ आत्मनोहंप्रत्ययग्राह्यत्वाभावे चक्षुरादेरप्यविषयस्य कुतः सिद्धिरिति मुग्धशंकां दृ
ष्टान्तेनापाकुर्वन्नात्मनो ग्निरपेक्षां स्वतः सिद्धिं साधयति॥ ॥श्लोक॥ यथान्यस्यापरिदमं शोधयः सः स्वतोमो राम२८

विशेषणं॥ विशेष प्रश्नस्यो यत्रासिद्धो ज्ञाश्चित्रगुर्यथा॥ ५॥ टीका॥ यावानिति॥ अहमित्यत्र यावांश्चिदवभासस्य लक
यो। क्षणेनेदमंशोऽहंकारादिर्यत्र विशेषणे स्यात्तस्मिंस्तानुगतप्रतिभासे प्रसगाल्लनि विशेष्यव्यवहारहेतुः स्यात्सः प्रत्यगा
त्मस्यो विशेषणत्वेनाभिमतात्तदहंकारादेः परः विशेष प्रश्न . यश्च सर्वेषां विशेषणानां प्रश्नयो व्यावृत्तिर्यस्मिन्निति
श्रुत्सतेनेनिर्विशेषश्च एवंरूपः स्वतः सिद्धोऽन्यनिरपेक्ष एवासिद्धः स्फुरत्यन्तनि॥ इति पदयोजना॥ यथा देवदत्तो विशेष
भूताया चित्रगोरस्य सत्संबंधात् . गेवासिद्धो न चित्रगोः संबंधं स्वसिद्धिं प्रत्यपेक्षते तथात्माप्यहंकारादिसंबंधात्मा
गेव स्वमहिम्नासिद्धो नाहंकारादिकं स्वसिद्धावपेक्षत इति दृष्टांत दार्ष्टांतिकसंगतोऽर्थः॥ ५॥ नन्वहमो नाशे कथम
हंब्रह्मेति तादात्म्यश्रुतिरूपपद्यते सा शंक्याध्यस्ताहंकारस्य मूलनिवृत्त्यानिवृत्त्यर्थाश्रुतिर्नाहंकारस्यात्मत्वप्रति
19 पत्त्यर्थेति परिहरति॥ ॥श्लोक॥ इदमंशोऽहमित्यत्र त्याज्यो नात्मेति पंडितैः॥ अहंब्रह्मेति शिष्टांशो भूतपू
र्वगतेर्भवेत्॥ ६॥ इति च्छिन्नवाप्रकरणं॥ टीका॥ इदमंशोऽहमिति॥ अहमित्य . आहंकारो भासेयइदमंशः त्व
स्वनात्मा दृश्य एवेति निश्चित्य पंडितैस्त्यज्यस्तस्मिन्नात्माभिमानो न कार्य इत्यर्थः॥ . कथं श्रुतिर्निर्दिश्यते त्विना तर्हि
ब्रह्मे हं॥ ॥ अहं . ति॥ अहंब्रह्मेति वाक्यार्थे निष्ठायां योऽहंकारांश उल्लिख्यते स भूतपूर्वगतेर्हेतोर्भवेत्॥ भूता
संज्ञाता पूर्वगतिः प्राप्तिस्तस्या इति विग्रहः॥ अहंकारलक्ष्यं . वस्तु तत्साक्षिरूपमहमितिश्रुत्योल्लिख्यत
इत्यर्थः॥ इति विशेषापोह प्रकरणषष्ठं विवृतं छिन्नाप्रकरणमिति वा॥ ॥ एवं कृतोऽन्वय व्यतिरेकस्य परिशोधि

उप॰स॰ त्पदार्थतत्वस्यवाक्यादेववाक्यार्थज्ञानमुत्पद्यतइत्युपपत्त्यानिर्धारितमर्थंस्वानुभवस्तंभेनस्पष्टीकर्तुंप्रकरणांतरमा
१९ रभते॥ ॥श्लोक॥बुद्ध्यारूढंसदासर्वंदृश्यतेयत्रतत्रवा॥मयातस्मात्परंब्रह्मसर्वज्ञश्चास्मिसर्वगः॥१॥टीका॥बुद्ध्यारू
ढमित्यादिना॥यस्मान्मयासर्वमध्यात्ममधिभूतमाधिदैवमित्यादिलक्षणेयत्रतत्रवाजाग्रत्स्वप्नयोरिहलोकपरलोकयो
र्वास्थितंप्रत्यक्षादिनःआत्मनोवायदुत्पन्नमस्तितत्सर्वंबुद्ध्यारूढंबुद्धिवृत्तिक्रोडीकृतंसदादृश्यतेप्रकाश्यतेतस्माद
हंसर्वदृश्याद्विलक्षणत्वात्परंप्रपंचातीतंब्रह्मास्मिसर्वज्ञःसर्वार्थप्रकाशकःसर्वगतोपरिच्छिन्नश्चास्मीत्यर्थः॥१॥ननुक
थमेतावतासर्वज्ञत्वंपुरुषांतरबुद्ध्यारूढेर्थेपुरुषांतरस्यानुभवस्मरणयोरसंभवादेकस्यात्मनःसर्वार्थप्रकाशकत्वा
सिद्धेरित्यतआह॥ ॥श्लोक॥यथात्मबुद्धिचाराणांसाक्षीतद्वत्परेष्वपि॥नैवापोढुंनवादातुंशक्यस्तस्मात्परोह्यहं॥२॥
टीका॥यथात्मेति॥आत्मनिसर्वव्यवहारप्रवर्तकतयाआत्मसंबंधिनीबुद्धिस्तस्याश्चाराःप्रचाराह्येतेषुआत्मबुद्धिचारा
मूला।धि अध्यात्माधिदैवस्थूलसूक्ष्मदेहात्मकास्तेषांसाक्षीस्फोरकोहंयथातद्वत्तथापरेषुपरकीयबुद्धिचारेष्वप्यहंसाक्षीसाक्षि
भेदेप्रमाणाभावात्मय्येवसकलंजातंमयिसर्वंप्रतिष्ठितंमयिसर्वंलयंयातितद्ब्रह्माद्वयमस्म्यहमित्यादिश्रुतेर्मय्ये हम
वैकस्मिन्नद्वितीयेआत्मनिसर्वप्रमातृतद्बुद्धितत्प्रचारगोचरस्यप्रपंचस्यकल्पितत्वावगमाच्चयुक्तंममसर्वज्ञत्वा
दीत्यर्थः॥यस्मादेवमहंसर्वसाक्षित्वेनसर्वाधिष्ठानत्वेनचसर्वज्ञःसर्वगश्चतस्मादपोढुमयमस्यद्रष्टानभवस्तत्रना
स्तीतिवानिराकर्तुंनैवशक्यःकेनचिन्नैवादातुंज्ञानेनाक्रिययावाप्रकाशयितुमुत्पादयितुमाकृष्टुंवाशक्योहि॥
यस्मादहंग्राह्यग्राहकादिप्रपंचविलक्षणस्तस्मात्परःपरमात्मैवेत्युपसंहारः॥२॥ननुबुद्ध्यारूढंचेत्सर्वंप्रकाश्य रामः१९

नेक्षेत्रज्ञेनतदादर्शनक्रियाकर्तृत्वाद्विकारित्वादिदोषप्रसक्तेस्तथात्मासत्वप्रसंगइतिशंकांनिरस्यति॥ ॥श्लोक॥
विकारित्वमशुद्धत्वंभौतिकत्वंनचात्मनः॥अशेषबुद्धिसाक्षित्वाद्बुद्धिवच्चाल्पवेदना॥३॥टीका॥विकारित्वमिति॥आ
त्मनोनविकारित्वंबुद्धिवत्सावयवत्वाभावात्सर्वविकारसाक्षित्वाच्चनत एवनात्मनोशुद्धत्वंक्रियागुणयोगि
त्वमस्तिसकलगुणक्रियावद्वस्तुसाक्षित्वाच्चनापिभौतिकत्वमात्मनोरूपादिहीनत्वात्किंचनात्मनोबुद्धिवदल्पवेद
नायथाबुद्धेर्बुद्धितत्संस र्गादिविषयावेदनास्तिनैवमात्मनोअशेषबुद्धिसाक्षित्वात्सर्वबुद्धिस्वरूपतद्विकारादिसाक्षि
त्वादित्यर्थः॥३॥यदिनिर्विकारएवात्मातत्कथंतर्हिससर्वार्थप्रकाशकइत्युच्यतेइत्याशंक्यलोकप्रसिद्धदृष्टांतेननिर्वि
कारस्यैवप्रकाशत्वमुपपादयति॥ ॥श्लोक॥मणौप्रकाश्यतेयद्वद्रक्ताद्याकारतातपे॥मयिसंदृश्यतेसर्वमातपेने
वतन्मया॥४॥टीका॥म णाविति॥मणौस्फटिकादिलक्षणेजपाकुसुमादिरूपारक्ताद्याकारताआतपेसूर्यालो
20 केसत्येवप्रकाश्यतेगृह्यतेयद्वत्तथामयिक्षेत्रज्ञेआदित्यस्थानीयेविद्यमानएवस्फटिकादिस्थानीयायांबुद्धौजपाकु
सुमादिरक्ततादिस्थानीयंसर्वंविषयजातंसंदृश्यतेतत्तस्मादातपेनेवानिःप्रकंपेनमयासर्वंप्रकाश्यतेनतुबुद्धिव
द्विकारवतानापिबुद्धिरेवद्रष्टीनचैवंसतिबु द्धेरनुपयोगएवचेतन्नस्याविषयविशेषाकारत्वापादनायतदुपयो
गादिति॥४॥इदानींप्रसंगात्मनोद्वितीयत्वमुपपादयंस्तस्यैशुद्धत्वंस्पष्टयति॥ ॥श्लोक॥बुद्धौदृश्यंभवेद्दु च
द्धौसत्यां [illegible] नास्तिविपर्यये॥द्रष्टायस्मात्सदाद्रष्टातस्माद्द्वैतंनविद्यते॥५॥बुद्धा वि॥

उप.स. ति॥जाग्रदादौबुद्धौसत्यांस्वाविद्ययाध्यस्तायांबुद्धौसमारूढंसत्तद्द्वयंद्वैतंभवेद्बुद्धवेत्॥नास्तिविपर्ययेबुद्धौसत्यां

२० स्वापादौद्वयंनास्तिजडस्याज्ञानसत्वेप्रमाणाभावादित्यर्थः॥द्रष्टानुसाक्षीसदासर्वोस्त्यप्यवस्थासुद्रष्टैवनद्वयवत्

स्वसत्तांव्यभिचरति॥यस्मादेवंसतःप्रकाशमानस्याव्यभिचारस्तद्व्यभिचारेणचासत्वानुपपत्तिस्तस्मात्तद्द्वैतंन

विद्यतइतिनित्यशुद्धएवप्रत्यगात्मेत्यर्थः॥५॥यद्यपिद्वैतसंसर्गं तमशुद्धत्वमात्मनोनास्तिद्वैतस्याभावात्तथापि

विद्याविद्याभ्यांसंबंधादशुद्धिर्भविष्यतीत्याशंक्यबुद्धेरेवविद्याविद्येनात्मनस्तत्संसर्गइतिशुद्धएवात्मेत्याह॥श्लो॥अ

विवेकात्पराभावंयथाबुद्धिरवैत्तथा॥विवेकात्तुपरात्स्वस्यःस्वयंचापिनविद्यते॥६॥टीका॥अविवे[illegible]कादिति॥नवि

द्यतेविवेकोभेदोभासमानतयायस्मिन्सोविवेकोदेहादौदेहात्म बुद्धिर्विपर्ययज्ञाननिमित्तियावत्तस्मादविवेकात्परस्या

संसारिणःसर्वसाक्षितयाविविक्तस्याभावमविद्यमानत्वंयथाबुद्धिरवैद्विदितवतीअत्रबुद्ध्यध्यासादेवचिदात्म

नोपिभ्रान्तियोगात्साभासाबुद्धिरेवाज्ञानविपर्यासाभयद्वयंगीकृत्ययथाबुद्धिरवैदित्युक्तमितिद्रष्टव्यं॥तथाविवे

७॥ कृत्तुनात्मापवादेनात्मनःस्वभावनिर्धारणंविवेकस्तस्माद्विवेकाद्धेतोःपरात्संसारिणःपरमात्मनोन्योजीवःसंसारीन

विद्यतेस्वयंचापिसाभासबुद्धिरपितन्निदानाज्ञानविद्यतेनह्यज्ञानमात्मत्वात्सर्वस्येत्यर्थः॥तथाचाज्ञानासम्यग्ज्ञा

नयोर्विद्याविद्यारूपयोरपिबुद्धिनिष्ठत्वादात्मनोशुद्धिगंधोपीतिभावः॥६॥इतिबुद्ध्यारूढप्रकरणंसप्तमंविवृतं॥७॥

ननुविद्याविद्ये योर्थयोःबुद्धिगतत्वंतर्हिसांख्यसिद्धान्तप्रसंगःसहिबुद्धिरेवपुरुषस्यापवर्गार्थंभोगार्थंचज्ञा राम

२०

नाज्ञानरूपनामाचरतीतिवदंतीत्याशंकामपनुदन्पूर्वस्वानुभवानुरोधेनसाधितमेवब्रह्मात्मज्ञानमात्ममनःसं
वादात्मकत्वेनप्रकरणांतरेणद्रढयति॥ ॥श्लोक॥चितिस्वरूपंस्वतएवमेमनेरसा दियोगस्तवमोहकारितः॥अतो
नकिंचित्तवचेष्टितेनमेफलंभवेत्सर्वविशेषहानतः॥५॥चितिस्वरूपामिति॥रसादियोगोरागादिनिबंधनोभोक्तृत्वादिसं
मो॰ हे॰ बंधःविवेकःफलितमाहातोनेति॥यस्मात्सर्वविशेषराहित्यात्तवचेष्टितेनमेममानाधेयातिशयस्यकिमपिफलंनास्ति॥१॥
श्लो॰ तस्मात्तवोपशामएवयुक्तइत्याह॥विमुच्येति॥विमुच्यमायामयकार्यतामिहप्रशांतिमायात्यसदीहितात्स दा॥अहं
व परंब्रह्मसदाविमुक्तवत्तथाजमेकंद्वयवर्जितंयतः॥२॥विमुच्येति॥मायामयकार्यतांमिथ्याचेष्टितांविमुच्यासदीहिता
न्निरर्थकप्रयासात्प्रशांतिंमत्रामग्निहमायिमत्सगात्मानिभयाहिभाप्नुहि॥अत्रमायामयचेष्टितासदीहितशब्दाभ्याम
विद्यानिबंधनत्वस्यसूचितत्वात्सांख्यमतशंकानिरवकाशीकृतावेदितव्या॥ननुकिमितिमत्संगात्संनिमनसोल
ना यउच्यतेसत्सशर्तादिलक्षणेब्रह्मण्येवकस्मान्नोच्यतइत्याशंक्याह॥सदाहंपरंब्रह्मेतियतःसदैवाहंब्रह्मैव यान
४१ थासतिसदाविमुक्तवन्मुक्तइवास्मितनुमेमुक्तिर्बंधाभावादितिभोजना ॥अजत्वविशेषणंजन्मादिसमस्त
विकारप्रतिषेधार्थंअतएकंसदेकरूपमित्यर्थः॥सजातीयभेदराहित्यमेतेनद्वयवर्जितंविजातीयभेदहो वा
नमित्यर्थः॥अनोयन्मय्येकीभूतंब्रह्मण्येवतदेकीभूतमभिनिविष्टेनपरेव्ययेसर्वएकीभवंतीतिश्रुते
विरोधइतिभावः॥अपरायोजनाहमतेअसत्सु स्वतःस्वरूपश्रमेषुदेहादि याविषयेषु यादिहि

लमभिलषितंदृष्टमदृष्टंवाफलंतस्मादसदीहितसदासर्वदाज्ञापदृष्टायामर्थेनष्टामममायाहितदर्थआपारंप
रियज्येत्यर्थः॥उपशांतांताधिष्ठमेवासानेधारयेत्याह॥विमुक्तेति॥कार्यतांबुद्धिरूपकार्यात्मतोविमुच्यविहाय
मायांकारणरूपांमायांअथगच्छत दार्मिकाभवतांहिततद्रूपेणस्थित्वापुनरुद्भाविष्यामीतिचेत्तत्राह॥इहेति॥
इहमत्स्वरूपएवांतस्यप्रविशकार्यकारणरूपतांविहायतेसायःपीतोदकाविंदुवन्मद्रूपग्रस्ताभवेत्यर्थः॥कर
थमेहंमुखांतःकवलीकृतब्रह्मांडकोटिर्मयेनस्ततश्चास्यमानेनखयाप्यस्तास्यामितिचेन्नाहंकहापिचाल्पयि
तुंलयाशक्यस्त्वंभ्रांतिमात्रमेतदित्यभिप्रेत्याह॥अहंपरंब्रह्मेति॥यतोहंसदापरंब्रह्मअयमात्माब्रह्मेतिश्रुतेरि
तियोर्जविमुक्तवदितिब्रह्मविशेषणंस्वार्थेतद्धितः॥विमुक्तंनित्यमुक्तमेवेत्यर्थः॥तथायथाश्रुत्युक्तंतथेत्यर्थः॥
आत्मानमन्यत्॥२॥ननुजजत्वादिमानिपादकत्वात्वंब्रह्मणोनिर्विशेषतथानित्यमुक्तत्वेपिकथमात्मनो
देहादिष्वन्वितस्यनिर्विशेषतयाब्रह्मरूपतासंभवइत्यतआह॥॥श्लोकः॥सदाचभूतेषुसमोस्मिकेवलोय
थाचखंसर्वगमक्षरंशिवं॥निरंतरंनिष्कलमक्रियंपरंततोनमेस्तीहफलंतवेहितैः॥३॥टीका॥सदाचभू
तेष्विति॥चशब्दोवधारणार्थः॥अहंकेवलोविधानत्कार्यरूपविशेषणरहितः॥सर्वेषुभूतेषुसमएवार
स्मितउपाधिपरामर्शमंतरेणमयिविशेषोक्तेरभावादित्यर्थः॥सर्वान्तस्यूतस्याप्यसंगस्वभावतयानिर्विशे
षत्वेदृष्टांतमाह॥यथाचखमिति॥आकाशस्यासंगत्वादेःप्रसिद्धत्वात्तस्मिन्खंकाकार्येणिचशब्दार्थः॥सर्व

गमित्यादीनिविशेषणानिब्रह्माकाशयोःसमानि॥यतःआकाशवत्केवलोहंसर्वभूतेषुसमोनआकाश
स्वभावोपमितंसर्वगमित्यादिविशेषणंपरंब्रह्मैवास्मीतियोज्यंतदुपपादितेब्रह्मात्मैक्येफलितमाह॥नतइ
३ ति॥ब्रह्मभूतस्यतत्वमदर्शिहितैःफलाभावेपिकथंचिन्मत्वेस्यैव तत्संबंधिनस्तांप्रतिगुणभूतस्यप्रधान
भूतस्यवाकस्यचिदर्थस्यकश्चिदुपयोगोभविष्यतीत्याशंकसोपिमायिदुःसंपाद्येत्याह॥ ॥श्लोक॥
अहंममैकोनतदन्यदिष्यतेतथानकस्याप्यहमस्म्यसंगतः॥असंगरूपोहमतोनमेत्वयाकृतेनकार्यंतव
९ चाद्वयत्वतः॥४॥टीका॥अहंममैकइति॥एकैवाहंचित्स्वरूपस्यममपरमार्थतःसजातीयविजातीयस
न गतभेदेमात्राभावात्ततोनममगुणभूतंकिंचिन्मत्तोन्यदिष्यतेमृग्यतेतथाकस्यापिप्रधानभूतस्याहंगुण
भूतोनास्मिकुतःअसंगतोनाथेयानिशायत्वादित्यर्थः॥यतोहमसंगरूपोऽतोनमेत्वयाकृतेनकिमपिप्रयोजनं
म नास्तिकिंचत्वमेवनासिकुतस्तवेहितंनस्त्वंचेत्यायेनाहनवचेति॥मत्स्वरूपाज्ञानकल्पितायाःतथाधिष्ठान स्र
भूतमत्स्वरूपस्यातिरेकाभावादभेदेचोपकार्योपकारकत्वासंभवादलौकिकस्यतयाप्रशंसनेवसंभवइत्यर्थः॥४॥
इदानींविहितार्थस्याप्याचार्यस्यस्वानुभवसिद्धार्थाविष्कारकेप्रकरणनिर्माणप्रवृत्तोनिमित्तंदुःखीजनदर्शनंसं
जातकरुणैवतस्मात्स्यादित्यभिप्रेत्याह॥श्लोक॥फलेचहेतोचजनोविषक्तोजानातिप्रार्थयाहमतोविमो

उप॰स॰ क्षणे॥ जनस्य संवादमिमं प्र... वानूस्वरूपतत्त्वार्थविबोधकारणं॥ ५॥ टीका॥ फलेनेति॥ अयं जनेहे
२२ तुफलात्मके संसारे विशेषेणासक्त वानिति प्रचेत्यपि मृत्युयनाद्जनस्य लोकस्यातः संसारादि मोक्षणे मोक्षा
र्थमहमिमं मस्यात्म... संवादरूपं ग्रंथं प्रयुक्तवान् प्रणीतवानस्मि किंमनेन संवादग्रंथेन जनस्य भवेदिति।
तदर्थेनं विशिनष्टि स्वरूपेति॥ स्वस्यात्मनो रूपं नित्यचैतन्यमस्य भावतत्त्वं तत्त्वार्थो ब्रह्म त्वं तस्यावि स्पष्टं बोधकारण
मित्यर्थः॥ ५॥ स तु एवं विधोयं संवादस्तत्साधनपर्यावृत्त... लक्षणात् संसारान्मुमुक्षुभिरयमनुचिंत नीय
इत्यभिप्रेत्याह॥ ॥श्लोक॥ संवादमेतं यदि चिंतयन्नरो विमुच्यते ज्ञानमहाभयागमात्॥ विमुक्तकामश्च तथा न
जनः सदाचरत्यशोकः सम आत्मविसुखी॥ ६॥ इति चिंतिप्रकरणं॥ टीका॥ संवादमेतमिति॥ अज्ञानकृतान्महाभ
यात् संसारादित्यर्थः॥ यद्वा महाभयस्यागमोयस्मात्तन्महाभयागमं मतानं तस्मादिति विग्रहः॥ भयहेत्वज्ञाना
द्विमुच्यत इत्यर्थः॥ कारणनिवृत्त्या कार्यनिवृत्तिमाह॥ विमुक्तकामश्चेत्यादि॥ चरति जीवन्नेव बंधनिर्भासरहितः
च सन् ब्रह्मण्येवरति कुर्वन् लोके भवतीत्यर्थः॥ सुगममन्यत्॥ मतिविलापनप्रकरणमष्टमं विवृतं॥ चित्तिस्वरूपप्रक
त्वानेन। रणमितिवा॥ ६॥ ॥यस्य प्रत्यग्ब्रह्मणो वाक्योत्थज्ञानतिवृत्त्या मुक्तिरुक्ता॥ तस्य सर्वांतरत्वेन निरतिशय सू
आविः क्ष्मत्वं चैव यथावत्त्वमिस्त्वं सूचितमुपपादयितुं प्रकरणांतरमारभते॥ श्लोक॥ सूक्ष्मत्वाव्यापितेज्ञेयेगंधादे
रुत्तरोत्तरं॥ प्रत्यगात्मावसानेषु पूर्वपूर्वप्रहाणतः॥ १॥ टीका॥ सूक्ष्मतेत्यादिना॥ गंधवान् वः पृथिवी शब्दा रामः २

र्थः॥ पृथिव्या दिलक्षणात्कार्यात्सूक्ष्मात्पूर्वस्मादुत्तरोत्तरंकारणतयास्थितेषुप्रत्यगात्मावसानेषुसर्वांतरासमृर्यं
तेषुपदार्थेषुयथाक्रमंपूर्वपूर्वग्रहणात्तःकार्याकारापोहेनसूक्ष्मतात्र्यापित्वाच्चावेशात्तथाकार्यकारणान्वयव्यतिरेका
लोचनयासंभावनीयेत्यर्थः॥कार्येषुविद्यमानमपिकारणस्वरूपंतत्रकार्याकारतिरोहितत्वयानस्वरूपेणावभासते
इतिसूक्ष्ममुच्यतेतेनपुनःकार्यपरिमाणान्न्यूनपरिमाणयोगात्तथासकलस्वविकारानुगतत्वेनोपादानकारणस्याकार्या
पेक्षयाऽधिकदेशवृत्तित्वेनव्यापित्वंचकारणस्यतथाहिचतुर्विधभूतग्रामोपादानरूपापृथिवीतावत्त्रभूतग्रामेषुगृह्य
माणेषुगृह्यतेतत्रतत्स्वरूपस्यव्यवहारादर्शनाल्लोकस्यअतस्तदपेक्षयासूक्ष्मातद्व्याप्तदेशावर्तित्वाद्व्यापिकाच
१ नचतत् कार्योपादानभूताःपृथिव्यंशाभिन्नाँतिनोपादानस्यव्यापकत्वेनितरांकार्याकारभेदव्यतिरेकेणमृ
त्स्वरूपभेदेप्रमाणाभावात्निरूपणात्तथाघटादौतत्स्थमृद्भिर्मितिकुसूलस्यगृहांगणदेशमृदात्मनाविलयाभावप्रसंगा
दुपादानादन्यत्रकार्यलयानुपपत्तेस्तस्मात्स्वकार्यापेक्षयापृथिवीतावत्सूक्ष्माव्यापिकाचासिद्धा॥तथाहिव्योम्न
पृथिवीतत्पदपांशुरआसीत्तत्समभवत्सापृथिव्यभवदितिश्रुतेर्जलपरिणामविशेषस्यशरक्षाव्दवास्य
दधिमंडाकारस्यपृथिव्यास्तत्वश्रवणात्स्वेदप्रस्रवणादेःपर्वताग्रशिलायामंतर्भूमौचसर्वत्रोपलंभात्॥ऐसच स
सार्द्रिलासाधारणगुणस्यपृथिव्यांसर्वत्रोपलंभात्तस्येकत्वेपिकटुतीक्ष्णत्वादिभेदःपरिणामविशेषोपा
धिनिबंधनइति॥तस्माज्जलव्याप्तापृथिवीसपरिणामेतिलंपृथिव्यापकंसूक्ष्मंचप्रागुक्तयुक्त्यासिद्धं॥तथा

उप॰स॰ सपृथिवीजलं तेजसा स्वकारणेन आप्तं सर्वत्रोपलभ्यते ॥ तस्याग्नेर्गोलकादौ सूर्यकिरणेषु चोदकस्य तत्प्रदर्श
२३ नाच्च ॥ तथा चैवं तेजसो जलाद्व्यापकत्वं सूक्ष्मत्वं च प्रसिद्धं ॥ तदपि वायुना ग्रस्तं यतश्चोदेति सूर्योस्तं यत्र गच्छतीति
प्राणाद्वा एष उदेति प्राणेस्तमेतीति श्रुतेः ॥ प्राणशब्दवाच्ये वायौ लयश्रवणात्तु ज्वालारूपवन्हेर्वाय्वाधीनप्रवृत्तिनि
वृत्तिदर्शनाच्च वायुराकाशेन ग्रस्त इति प्रसिद्धमेवैतत् ॥ सूक्ष्मत्वं तु व्याप्यत्वमेव सर्वत्र ए ॥ तत्सर्वं सत्तास्फूर्तिभावा
त्मेवानुभूयत इति सच्चिन्मात्रं सर्वस्योपादानं तस्य चार्थान्तरेणानुगमादर्शनान्निरूपादानकत्वे सिद्धे निरपेक्षव्याप
स्वा कत्वं प्रगुणरूपरूपो निरतिशयसूक्ष्मत्वं च सिद्धमिति तदेत ॥ तत्सच्चिन्मात्रेण सर्वस्य दृश्यराशेर्ग्रस्तत्वान्न ततः पृ
थक्किमपि वस्तु विद्यत इति तस्य परमसूक्ष्मता व्यापित्वे निश्चित्य सोहमसंगकूटस्थाद्वयात्मेति सदा भावयेदिति
धः तात्पर्यार्थः ॥ ७ ॥ ननु नैतावतात्मन उक्तरूपत्वज्ञानसिद्धिरध्यात्माधिदैवतयोः पृथिव्याद्यभेदेन प्रथमानत्वादित्यत आ दे
ह ॥ ॥ श्लोकः ॥ शारीरा पृथिवी तावद्यावद्बाह्या प्रमाणतः ॥ जलादीनि च तत्त्वानि तावन्ति ज्ञेयानि कृत्स्नशः ॥ ८ ॥ टी ॥
व शारीरेति ॥ यावद्बाह्या पृथिवी प्रमाणतः परिमाणतो भवति तावत्प्रमाणा शारीरा पृथिवी ज्ञेयेति संबंधः ॥ तथा जलादी ति
नि चत्वारि भूतानि कृत्स्नशो निरवशेषं तथा तावत्तावत्प्रमाणानि ज्ञेयानि यावच्छारीराणि बाह्यानि च पृथिवीति यो
जना ॥ एतदुक्तं भवति ॥ अध्यात्माधिभूताधिदैवात्मना विभक्तानां पृथिव्यादीनामेकात्मतानिर्ज्ञाने तत्वा
देकप्रत्यक्त्वेन प्रविलापनोपपत्तेः ॥ सर्वत्र प्रत्यक्त्वानुगमात् प्रत्यगवसानमेवाध्यात्मादिरूपं तेन बाह्यं न ततः पृ राम
२३

चिन्मात्रे

थगस्तीति प्रत्यक्त्वे वर्ण्यमाणे वा स्वाध्यासिकादिभेदस्फूर्तेर्नवकाशः प्रत्यगात्मनश्चिन्मात्रमेव सर्वमव-
शिष्यत इति भवेदेव प्रागुक्तात्मतत्त्वज्ञानसिद्धिरिति॥२॥ नन्वेवं परागर्थस्यासत्त्वे कथमात्मनः प्रत्यक्त्वं सर्वगतत्वमि-
त्याद्युपपद्यते तस्य पराचीनविकारापेक्षत्वात् अतः कथं पराचां प्रत्यगात्मावसानत्वमित्याशंक्य चिन्मात्रस्वरूपस्यापूर्वा- स्पै
दिलक्षणस्य प्रत्यगात्मशब्दैर्लक्ष्यत्वाल्लक्ष्यमाणदशायामारोपितपरागर्थापेक्षायामपि स्वरूपस्यान्यानपेक्षत्वा- स्व
द्युक्तं सर्वस्य प्रत्यगात्मावसानत्वावधारणमिति दृष्टान्तेनोपपादयति॥ वेदादीनां यथोत्पत्तेः पूर्वं खं सर्वगं तथा॥ अ- श्लोक
हमेकः सदा सर्वश्चिन्मात्रः सर्वगोऽद्वयः॥३॥ टीका॥ वेदादीनामित्यस्य स्पष्टार्थः॥ ननु कथमाकाशवदेक एवात्मा स्य
सर्वात्मा भवेत्॥ ब्रह्मादिभेदेनात्मनामनेकत्वस्य विभाव्यमानत्वात्तथा चैतन्यमात्रत्वं चानुपपन्नं रागादिदोषसंस-
॥श्लोक॥ र्गोपलब्धेरित्याशंक्याह॥ ब्रह्माद्याः स्थावरान्ता ये प्राणिनो मम पूः स्मृताः॥ कामक्रोधादयो दोषा जायेरन्मे कुतो-
ऽन्यतः॥४॥ ब्रह्माद्या इति॥ ममैव चिदात्मनः सर्वे प्राणिनः पूः पुरं शरीरभूताः स्मृता निर्णीता इत्यर्थः॥ तथा काम-
२५ क्रोधादयो दोषा आत्मनो मे न स्वाभाविकाव्यभिचारित्वात् परतोऽपि तेन संभवन्तीत्याह॥ जायेरन्मे कुतोऽन्यत इति॥
अन्यस्याभावादेवेत्यर्थः॥४॥ प्रत्यगात्मनो निर्दोषत्वमसिद्धं संसारदोषस्य प्रत्यक्षत्वादित्याशंक्याकाशाका-
श्यप्रत्यक्षवदात्मनि दोषदृष्टेर्भ्रमत्वान्मैवमित्याह॥ श्लोक॥ भूतदोषैः सदाऽस्पृष्टं सर्वभूतस्थमीश्वरम्॥ नीलं
व्योम यथा बालो दुष्टं मां वीक्षते जनः॥५॥ टीका॥ भूतदोषैरिति॥ अस्पृष्टमित्यच्छेदः॥ सर्वभूतेषु स्थितस्यापि

उप॰स॰ न दोषैरस्पृष्टत्वमीश्वरत्वादिति हेत्वर्थं विशेषणमीश्वरमिति सर्वस्येशितारं कारणमित्यावत् न हि कारणं कार्यध
२४ र्मैः संस्पृश्यत इत्यर्थः स्पष्टमन्यत्॥५॥ यदुक्तं ब्रह्माद्यास्थावरान्ताः प्राणिन एकस्यात्मनः शरीरभूता इति तत्
ते कथमित्यत आह॥ श्लोकः॥ मच्चैतन्या वभासत्वात्सर्वप्राणिधियां सदा॥ पूर्मम प्राणिनः सर्वे सर्वज्ञस्य विपाप्म
नः॥६॥ टीका॥ मच्चैतन्येति॥ सर्वज्ञस्य सर्वावभासकस्यात एवापाप्मनो दृश्यदोषसंसं रहितस्य ममात्मनः स र्ग
र्वे प्राणिनः पूः शरीरं कुतः सर्वप्राणिधियां सदा मच्चैतन्यावभासत्वादिति योजना॥ यो यं विज्ञानमयः प्राणे
षु हृद्यन्तर्ज्योतिः पुरुष इति श्रुतेः। बुद्ध्यन्तःसाक्षितया प्रकाशमानस्य चैतन्यज्योतिष एव सर्वप्राणिध्यवभासत्वावगमा
त्तस्य च बुद्धितत्प्रकाशभेदमन्तरेण स्वरूपतः भेदानिरूपणात्सवितुरिवोदपात्रगतस्याभासव्यतिरेकेणेति सि
द्धमेकस्यात्मनः सर्वाणि भूतानि शरीराणीति भावः॥ तथा च श्रुतिः॥ यस्य सर्वाणि भूतानि यः सर्वाणि भू शरीरं
ता न्यन्तरो यमयत्येष त आत्मान्तर्याम्यमृत इति॥६॥ न हि भास्यप्राणित्व बुद्धीनां सत्वाद्द्वैतक्षतिरिति चेन्नेत्या
ह॥ श्लोकः॥ जनिमज्ज्ञानविज्ञेयं स्वप्नज्ञानवदिष्यते॥ नित्यं निर्विषयं ज्ञानं तस्माद्द्वैतं न विद्यते॥७॥ जनिमदिति॥ टीका
जनिमच्च तज्ज्ञानविज्ञे यं यत्कार्यं जडं च तन्मिथ्येष्यते यथा स्वप्नज्ञानं तथा जाग्रदपि कार्यदृश्यं चेतनमि
तु से थ्येति द्वैतं न विद्यत इत्यस्मात्तस्मा यस्मात्सत्यात्ज्ञानं नित्यं सदा निर्विषयं विषयानिरूप्यं न भवतीत्यद्वा नित्य
म विनाशि सर्वविनाशसाक्षित्वादिति योजना तथ्यापोपितेन द्वैतेन परमार्थमद्वैतं विहन्यते न सैतत्वारोपितेन राम २४

तोयादिनानदाधारभूम्यादिसाद्वितीयदृष्टमितिभावः॥७॥स्वरूपज्ञानस्यनिर्विषयत्वंनित्यत्वंचोक्तंश्रुत्योपपादयति॥॥
श्लोकः॥ज्ञातुर्ज्ञातेर्हिनित्योक्तासुषुप्तेत्वन्यशून्यतः॥जाग्रज्ज्ञानिस्त्वविद्यानस्तद्ग्राह्यंचसदिष्यतां॥८॥टीका॥ज्ञातुर्ज्ञातिरिति॥
सुषुप्तेत्वन्यस्यज्ञेयस्यासत्वप्रदर्शनपूर्वकंज्ञातुरात्मनोज्ञातिःस्वरूपभूताज्ञप्तिर्नित्योनिष्क्रस्योअनेहीत्यर्थः॥तथाच
श्रुतिःयद्वैतन्नपश्यतिपश्यन्वैतन्नपश्यतिनहिद्रष्टुर्दृष्टेर्विपरिलोपोविद्यतेऽविनाशित्वान्नतुतद्द्वितीयमस्तिततोऽन्य
द्विभक्तंयत्पश्येदित्यादिका॥यद्यपिसुषुप्तेनिर्विषयंज्ञानंविषयाभावात्स्वरूपतोनाशशीलत्वाभावाच्चनित्यंश्रुति स्यं
सिद्धं॥तथाप्यवस्थांतरेसविषयमुपलभ्यतइतिज्ञातुर्ज्ञातिरनित्यास्यादित्यतआह॥जाग्रदिति॥यतःश्रुति
सिद्धंनित्यंनिर्विषयंज्ञानमतः॥कारणात्जाग्रद्निर्विषयदर्शनासिकोविद्याभ्रांतिरेवात्मनोनिर्विकारत्वयाज्ञा
25 नकर्तृत्वायोगादंतःकरणस्यचजडत्वादेवज्ञानाश्रयत्वानुपपत्तेरध्यस्तमेवसविषयंज्ञानंतद्ग्राह्यंचविषयजातम
सदापरमार्थमिथ्यतांस्वीक्रियतामित्यर्थः॥जागरितादौविषयाकारबुद्धिवृत्तीनांस्फुरणावगुंठितत्वात्सर्ववृत्तु
स्यन्निस्थितिविनाशसाक्षितयास्फुरणस्यैकस्यनित्यस्यानस्यावश्याभ्युपगमनीयत्वाज्जाग्रत्स्वप्नासत्वेनत्वंनित्यमे
व॥तथाविषयाणांवृत्तिसमकालमेवस्फुरणाद्विषयव्यभिचारेपिस्फुरणाव्यभिचारात्तस्यविषयानिरूप्यत्वान्नि
र्विषयत्वंचासिद्धमितिभावः॥८॥नन्वात्मावारेद्रष्टव्यःश्रोतव्योमंतव्योनिदिध्यासितव्यइतिश्रुत्यैवात्मनोदर्शे

उपे·स· नादिकर्मत्तोक्तेर्दृश्यत्वाद्दृशानाभुजंगादिवदसत्त्वप्राप्तिरित्याशंक्याशब्दमस्पर्शमरूपमव्ययं॥तथारसंनित्यं
२५ मगंधवच्चयत् न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वेत्यादिश्रुतिविरोधाद्रूपादिहीनस्य दर्शनाद्य
विषयत्वात् द्रष्टव्य इत्यादिश्रुतिरर्हार्थेन तव्येन योगाद्दर्शनार्हत्वोपदेशमुखेनानात्मप्रवणतात्याजनार्थेत्याह॥श्लोक॥
रूपवत्वाद्यसत्वान्न दृश्याद्यैः कर्मता यथा॥एवं विज्ञानकर्मत्वं भूम्नो नास्तीति गम्यते॥१०॥इति सूक्ष्मताप्रकरणं॥१०॥
व टीका॥रूपवत्वादीति॥यथा द्रष्टव्य इत्यादिवशान्नज्ञानकर्मत्वमेवं यत्र नान्यत्पश्यति नान्यद्विजानातीति सम्प्र नान्य
मेत्यत्रापि प्रागुपन्यस्तश्रुतिविरोधाद्यत्रान्यत्र पश्यत्यात्मानमेव पश्यतीति स्वात्मदर्शनविधिपरत्वकल्पना
योगाद्भूम्नो ब्रह्मणो विज्ञानकर्मत्वं नास्तीति गम्यत इति श्रीपतेरर्थः॥सूक्ष्मताख्यमिदं प्रकरणं नेमेवैविवृतं॥१०॥
इदानीं पूर्वप्रकरणेषु न्यायमवस्थापितमात्मनो निर्विषयज्ञानस्वभावत्वं स्वानुभवाभिनयेन प्रकटयन्नवि
षयत्वेनैवात्मज्ञानं भवतीति निश्चाययितुं प्रकरणान्तरमारभते॥श्लोक॥दृशिस्वरूपं गगनोपमं परं सकृद्विभातं त्वज
मेकमक्षरं॥अलेपकं सर्वगतं यदद्वयं तदेव चाहं सततं विमुक्त ॐ॥१॥टीका॥दृशिस्वरूपमिति॥सकृद्विभा
तमेकदैव विस्फुरितं सदैव स्वप्रभासमानमिति यावत् तदेवं विमक्षरं ब्रह्म स तदेवाहं सततं भवामि अतो मुक्तः ॐ
मित्यभ्यनुज्ञार्थ ॐकारः उक्तस्वरूपमोंकारदास मुमुक्षुबुद्धावभिव्यक्तं भवतीति स्वचयितुं ॐकारनिर्देशः॥१॥
ननु नाकाशवदलेपकत्वं [illegible] त्याशंक्य दृशेरात्मस्वरू राम २५

ध परं

पत्वात्तस्य चानित्यशुद्धत्वादेःश्रुत्यैवानिर्द्धारणान्नैवमित्यभिप्रेत्यश्रुतिसिद्धमर्थंप्रकटयति॥श्लोक॥दृशिस्तुशुद्धो
हमविक्रियात्मकोनमेस्तिकश्चिद्विषयःस्वभावतः॥पुरस्तिरश्चोर्ध्वमधश्चसर्वतःसंपूर्णभूमात्वजआत्मनिस्थितः॥२॥
टीका॥दृशिस्तुशुद्धइति॥अहंतुदृशिःज्ञानस्वरूपइत्यन्वयः॥अतःपरमार्थतःशुद्धः॥शुद्धोदेरज्ञाननिबंधनत्वात
स्यचाभासत्वादितिभावः॥शुद्धमपापविद्धमितिमंत्रवर्णान्नूयतश्चाविक्रियात्मको॥क्रियात्मकात्प्राणादेरन्यो॥प्रा
णोह्यमनाःशुभ्रोस्थूलमनण्वह्रस्वमदीर्घमित्यादिश्रुतेरतोपिशुद्धइत्यर्थः॥ननदृश्यातिकंचननतद्दृश्यातिकश्चे
श्रुते नेति॥गीतासुनोविषयसंसर्गइत्याह॥नमेस्तीतिस्वभावतःपरमार्थतः॥अनेनाविक्रियाहेतुविषयाभावादस्यावि
क्रिय इत्युक्तंभवति॥विषयाभावेनाद्वयात्मकत्वेभूमवाक्यशेषमर्थतःपठतिपुरस्तिरश्चेति॥सभगवःकस्मिन्प्रति
ष्ठितइतिस्वेमहिम्नियदिवानमहिम्नीतिस्वरूपावस्थानमनन्याधीनमुपन्यस्यतदुपपादनायेदंकारास्पदंसर्वंपूर्वो
द्यविभागेनाधस्तादारभ्यभेदेनचोपलभ्यमानंभूमैवेतिभणितिपाद्याहंकारास्पदस्यदेहादिबुद्धिपर्यंतस्यतर्हिभूम्नो
२८ भेदइतिशंकायामहंबुद्धिग्राह्यमपिभूमैवेतिमध्येनिर्दिश्येदमनिदमात्मकस्यसर्वस्यभूम्नोन्यत्वाभावेभेदकाभा ना
वाद्भूमात्मासैवभूमेत्यात्मैवेदंसर्वमित्यनेनसंपूर्णभूमाछांदोग्येदर्शितइत्यर्थः॥अजोहमाविभागवर्जितोत्य
तआत्मनिस्वेमहिम्निस्थितोनान्याधीनइत्यर्थः॥२॥आत्मनोजन्मजरादिविक्रियाभावेनकूटस्थाद्वयत्वाभाव्य
प्रातिपादनपराःश्रुतीःस्वरूपत्वेनार्थतश्चपठति॥श्लोक॥अजोमरश्चैवतथाजरोमृतःस्वयंप्रभःसर्वगतोहमद्वयः॥

उप॰स नकारणंकार्यमतीवनिर्मलःसदैकतत्त्वश्चनतोविमुक्तः ॥ॐअजोमरइति॥तथावश्रुतयः॥अजोनित्यःशाश्व
तोयंपुराणःसवाएषमहानजआत्माजरोमरोमृतोभयोब्रह्मेति॥अयंपुरुषःस्वयंज्योतिःनसूर्यंज्योतिषांज्यो
मे तिर्नित्यंविभुंसर्वगतंसुसूक्ष्मंएकोदेवःएकमेवाद्वितीयमिति॥नदेतद्दृष्ट्वापूर्वमनपरमनंतरमबाह्यमित्यादि
श्रुत्यर्थमाह नकारणंकार्यमिति॥निर्मलोनिरंजनःपरमंसाम्यमुपैतीतिश्रुतेः॥एकोद्यःएकेननिजानंदेनैवन्न
त्यहत्यर्थः॥आनंदंब्रह्मणोविद्वान्नबिभेतिकुतश्चनजानंदरूपेमेनंयादिभातिइत्यादिश्रुतेः॥विमुक्तश्चविमुच्यत
इतिश्रुतिमाश्रित्याह॥ततोविमुक्तइति॥यतःएवंलक्षणस्ततोविमुक्तएवसदेतिपदं॥सर्वत्रानुषंजनीयं॥यदात
वेदान्तंममस्वरूपंतत्तथैवेतिशिष्योनुमन्यते ॥मितिपदेनेत्यर्थः॥ननुस्थानत्रयेन्यथान्यथाप्रथमानस्य
कथमविक्रियात्मकत्वमित्यतआह॥श्लोक॥सुषुप्तजाग्रत्स्वपतश्चदर्शनंनमेस्तिकिंचित्स्वमिवेहमोहनं॥स्वत
श्चतेषांपरतोप्यसत्त्वतस्तुरीयएवास्मिसदादृगद्वयः॥४॥टीका॥सुषुप्तेति॥सुषुप्तश्चासौजाग्रच्चस्वपसोश्च
श्च तेसुषुप्तजाग्रत्स्वपन्तस्यसुषुप्तजाग्रत्स्वपतोममसाक्षिवात्मीयमिवेहव्यवहारेकिंचिद्दर्शनंनास्तिस्वमिव तो
स्वरूपभूतामिवेतिवार्किंतुमोहनमविवेकाविद्याध्यारोपितंजाग्रदादिदर्शनमित्यर्थः॥तत्रहेतुमाह॥स्व
ति तश्चेति॥तेषांजाग्रत्स्वप्नसुषुप्तदर्शनानांजाग्रदाद्यवस्थारूपाणांवास्वतश्चपरतोप्यसत्त्वतो ॥सत्त्वोद्विस्वक्षर
योजनानाहितेषांस्वतोन्यनिरपेक्षंसत्त्वंसंभाव्यतेचकारात्तुस्फुरणंच आगमापायित्वेनरज्जुसर्पवदारो एम॰६
तत

पित्तत्वनिश्चयात्तथा परतोपिनसत्वंस्फुरणंचसंभवों ·नेपरंचैतन्मंस्यान्नहिनेनासनासत्वादिकमेषांसंभवति॥अस्य
कूपराकूभावेनविरूद्धस्वभावयोस्तादात्म्यानुपपत्तेस्तत्कल्पनायाश्चभ्रांतिमात्रत्वादित्यर्थः॥प्राज्ञस्तेजसोविश्वइत्येनेनतद
वस्थावत्वेनभासमानानममस्वरूपमितिभावः॥नहिकिंस्वरूपआलोनिनदाहतुरीयएवास्मीति॥विश्वादित्रयापेक्ष या
परतोगम्यमानत्वाच्चतुर्थइत्यर्थः॥क्लिन स्यलक्षणं॥सदादृगितिसर्वावस्थाद्रष्टेत्यर्थः॥विश्वादीनांस्वस्वावस्थामात्रद्रष्टृ
त्वादयंतत्तोव्यतिरिक्तः स्थूलसूक्ष्मक्रमेणविविक्तान्वेषणदशायांविश्वादिस्थानत्रयापोहेनगसीयमानत्वात्तुरीयःइ
त्युच्यतेनेनपुनर्वस्तुतस्तुरीयस्त्वमस्तीतिश्लोकयस्यइत्यइतिनिर्विशेषएवसदाहमस्मीत्यर्थः॥४॥कथमात्म नोनिर्वि
शेषत्वंशरीरादिसंबंधस्यप्रत्यक्षत्वादित्यत आह॥श्लोक॥शरीरबुद्धीन्द्रियदुःखसंततेर्नमेनचाहंममनिर्विकारतः॥
असत्वहेतोश्चतथैवसंततेरसत्त्वमस्याःस्वपतोहिदृश्यवत्॥५॥टीका॥शरीरेति॥शरीरादिसंततेर्नमदासत्वंम
दीयत्वंवापरमार्थतोस्तीत्यर्थः॥तत्रहेतुर्ममनिर्विकारत्वइतितस्याविक्रियत्वात्रागमापायिशरीराद्यात्मनापरिणमतेसं
सृज्यतेवायेनतत्स्वरूपतानहूर्मताभ वेदित्यर्थः॥हेत्वंतरमाहासत्वहेतोश्चतथैवसंततेरितिकुतोसत्वमित्यत आह॥
सत्वमस्याइतिस्वपतःस्वप्नावस्थायांयथादृश्यंमिथ्यातथास्याःसंततेर्दृश्यत्वादेवासत्वमित्यर्थः॥हिशब्दःस्वप्रदृश
स्यैथ्यात्वप्रसिद्धिं त नार्थः॥५॥शरीरादिसंततेर्दृश्यत्वेनचेन्मिथ्यात्वंतर्हिशुद्धत्वाविक्रियत्वादेरपिदृश्यत्वान्मि
थ्यात्वंकिंनस्यादित्यत आह॥श्लोक॥इदंतुसत्यंममनास्तिविक्रियाविकारहेतुर्नहिमेद्वयत्वतः॥नपुण्यपापेन

उप.स. चमोक्षबंधनेन चास्तिवर्णाभिमतः शरीरतः ॥६॥ टीका ॥ इदं खिति ॥ मम विक्रिया नास्ति न मे विकारहेतुरप्यस्ति नतः पूर्वोक्ति
२० रूपितादद्वयात् द्वयाभावाद्धेतोः स्वतः परतो वा मम आत्मनो विक्रिया नास्तीति यदिदं तत्सत्यमित्यर्थः ॥ तु शब्दः शंकायामित्यर्थः ॥
अविक्रियत्वादिना विक्रियाभावाद्युपलक्षितस्वरूपस्याभिप्रेतत्वात्तत्सिद्धहेत्वसिद्धेर्न शंकावकाश इत्यर्थः ॥ कर्मवानस्म
लंघानत् ध्वंसो वा कर्मादिसाधनं वा विक्रियादिहेतुर्भविष्यतीति कुतो द्वयत्वमित्याशंक्याह ॥ न पुण्यैरिति ॥ पुण्यादिनेति भवति ज्ञायां ॥
हेतुश्शरीरत [illegible] इति ॥ अशरीरत्वं तु पूर्वश्लोके प्रतिपादितमेवेत्यर्थः ॥ ६ ॥ ननु यद्यपि शरीरोपादा
नत्कर्मक नत्वेनैवात्मनः शरीरत्वाभावस्तथापि शरीरेणास्ति संबंधः उपलंभोपलंभकभावलक्षण इति कथम् शरीरत्वमाशंक्याने
त्वेन नावत्तामसशरीरत्वेन कर्मादियोगित्वात् इत्यभिप्रेत्य पुण्यापुण्यादिसंबंधं र्द्धर्मयुक्तमुपपादयति ॥ श्लोक ॥ अनादित्वान्निर्गुण ध
तोन कर्म मे फलं च तस्मात्परमोऽहमद्वयः ॥ यथा नभः सर्वगतं न लिप्यते तथात्मेह देहगतोऽपि सूक्ष्मतः ॥७॥ टीका ॥ अना
दित इति ॥ यत्कर्मसमवायि तदादिमद्दृष्टं यथा रथशरीरादि न च परमाणुमनसोरनेकान्तो मनसः उत्पत्तिश्रवणात् परपरि
कल्पितपरमाणवनंगीकाराच्च तथा यत्कर्मसमवायि तत्सगुणं दृष्टं यथोक्तमेवोदाहरणं ॥ तथा च सगुणत्वं सादित्वं च
आपकं प्रत्यगात्मनो व्यावर्तमानं तस्य क्रियावत्वं स्वव्याप्यसाधनयनिवर्तनं इति भावः ॥ कर्मधर्मादिलक्षणं फलं तस्मा पु
ध्वं सुखदुःखादिरूपं फलं च न मेऽस्तीत्यन्वयः ॥ तस्मादहं परमः उत्तमः संसारिभ्यो विलक्षणः ॥ अद्वयो निर्विशेषः कि
यावत्वाभावात्तत्साध्यपुण्याद्यसंभव इति विलक्षणत्वमुपपादयति यथेति ॥ देहगतो देहे शतसत्वोपलभ्यमानो
पीत्यर्थः ॥ सूक्ष्मतो मूर्तत्वादित्यर्थः ॥ तथा चाह भगवान् अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः ॥ शरीरस्थोऽ राम २०

पिकौंतेयनकरोतिनलिप्यते॥यथासर्वगतंसौक्ष्म्यादाकाशंनोपलिप्यते॥सर्वत्रावस्थितोदेहेतथात्मानोपलिप्यते॥७॥
ननूपलब्ध्यधिष्ठानानांदेहादीनांवैषम्यदर्शनात्तत्रोपलभ्यमानस्यात्मनोपितत्कृतंवैषम्यसंभवात्कुतःपरमात्मसंपरि
तारतम्य पूर्णताचेत्स्यात्रांकोयंप्रतिभासोऽविद्याविलसितोनपरमार्थतइत्याह॥श्लोकः॥सदाचभूतेषुसमोहमीश्वरःक्षराक्षराभ्यांपरमोथ
त्म चोत्तमः॥मयैवतत्वभ्रमतथाप्ययोपिसन्तुविपर्ययेणाभिमतस्त्वविद्यया॥८॥टीका॥सदाचेति॥ईश्वरइत्यनेनोपाधिवश्यत्वा
भावंसूचयति॥अतोनमेदेहादिकृतंवैषम्यमित्यर्थः॥ईश्वरइत्युक्तेतस्येशितव्यापेक्षत्वात्सद्वयत्वशंकास्यात्तत आहक्ष
राक्षराभ्यामिति॥अथवाईश्वरत्वमेवसाधयति॥क्षराक्षराभ्यामितिहियस्मात्क्षराक्षराभ्यांपरमोथतस्मादहमुत्तमइ
त्यन्वयः॥क्षरतिनश्यतीतिक्षरंकार्यवर्गः॥नक्षरतीत्यक्षरं कारणंमायाशबलितंचिद्वस्तुताभ्यांपरमोतिरिक्तःकार्यका
रणादिभेदकस्यताधिष्ठानभूतइत्यतउत्तमःपुरुषोत्तमइत्यर्थः॥यतउत्तमोतःपरेषामात्म नांतत्वंस्वरूपमस्मि॥ति
परात्मतत्वभ्रमअहमेवसर्वात्माचेत्यर्थः॥एवंविधश्चेदात्माकथंतर्हितत्राविपरीतरूपप्रतिभासइत्यतआह॥तथाप्ययोपि
सन्निति॥उक्तोत्तरमेतदविद्याविलसितएवविपर्ययइत्यर्थः॥तथाचभगवतोक्तंद्वाविमौपुरुषौलोकेक्षरश्चाक्षरएवच॥क्ष ६
रःसर्वाणिभूतानिकूटस्थोक्षरउच्यते॥उत्तमःपुरुषस्त्वन्यःपरमात्मेत्युदाहृतः॥योलोकत्रयमाविश्यबिभर्त्यव्ययईश्व
रः॥यस्मात्क्षरमतीतोहमक्षरादपिचोत्तमः॥अतोस्मिवेदेलोकेचप्रथितःपुरुषोत्तमः॥८॥नहिकिमविद्यासंबंधोव
ते र्ततेत्याह॥॥श्लोकः॥अविद्ययाभातनयाचकर्मभिर्विविक्तआत्माप्यवधिर्निर्मलः॥दृगादिशक्तिप्रभवितोहमद्वयः सु
स्थितःस्वरूपेगगनंयथाचलं॥९॥टीका॥अविद्ययेति॥अविद्यामूलाज्ञानभावनातत्कृतोदेहाद्यभिमा नःकर्मा

णितस्सर्वकर्माणिपुण्यपापलक्षणानितेनोर्वविविक्तस्तत्संस्पर्शशून्यः॥कूटस्थोयस्मादस्यबाधिरवधिर्वाबाधानंवस्त्वंतरकृतो
वच्छेदस्तद्रहितोऽनवधिः॥अयमाशयः॥चित्सकाशस्तावदात्मेतिश्रुतिस्मृतीतिहासपुराणन्यायैःसिद्धं॥अविद्यार्जडात्मका प वं
शात्मिका॥अतस्तयोर्विरुद्धस्वभावयोःपरमार्थतःसंबंधोदुर्घटएवेतिस्थितेतेनविच्छिन्नचेतनस्यमानांतंतावन्नाविद्याश्रयः।
उपपद्यते॥तथासत्यणुमात्रस्यापिप्रकाशानुपपत्तिप्रसंगात्॥नापिकेनचिदवच्छिन्नभागविशेषमविद्यातिरि
क्तस्यतस्यकल्पनायाऽअनिबंधनत्वात्तस्मादविद्यातिरिक्तमवधानाभावादनवधित्वेसतिनिर्विबंधपरिकल्पितंाथ
कारवदात्मन्यविद्यादिकल्पनामिति॥अतएवसुनिर्मलःसर्वाशंकितदोषरहितइत्यर्थः॥एवंविधस्यात्मनिकथंद्रष्टा
श्रोतामंताबोद्धेत्यादिव्यवहारइत्याशंक्याविद्याध्यस्तांतःकरणपरिणामरूपदृग्दृशिशक्तिसंबंधादेवद्रष्टृत्वाद्यु
पचर्यप्रतिभासोनपरमार्थतइत्याह॥दृग्यादीतिस्पष्टमन्यत्॥५॥एवंविधात्मतत्त्वपरिज्ञानेसतिकैवल्यंफलमित्याह॥
श्लोक॥अहंपरंब्रह्मविनिश्चयात्स[illegible]दकुन्नजायतेभूयइतिश्रुतेर्वचः॥नचैवबीजेत्वसतिप्रजायतेफलंजन्मा नं
स्तिततोह्यमोहता॥६॥टीका॥अहंपरंब्रह्मेति॥अहंपरंब्रह्मेतिविनिश्चयेनात्मनिदृकज्ञानंयस्यानथोक्तःसम्भू दि
यःपुनर्नजायतेशरीरवाननुभवतीतिश्रुतेर्वचोविद्यतइतिशेषः॥तथाचश्रुतिःसुनुतसदमान्नोतियस्माद्भूयो
नजायतेपुरुषान्नपरंकिंचित्साकाष्ठासापरागतिरिति॥अथोसोभयंगतोभवतिब्रह्मविद्ब्रह्मैवभवतीत्यादि
चश्रुतिसिद्धेर्थेयुक्तिमप्याह॥नचैवेतिउक्तंसामान्यन्यायंप्रकृतेयोजयतितजन्मास्तीतिहियस्मादमोहताभ
गुनत्वस्मनामोहराहित्यंततोऽइत्योत्रनजन्मास्तीतियोजनामोहपदंचाप्यविद्यामहत्त्वाज्जन्मादिविकारस्येतद राम २८

भावेऽभाव एवेत्यर्थः॥११०॥ मोहकार्यत्वात्संसारस्य मोहनिवृत्त्या निवृत्तिरेवेत्युक्तं तत्र किमात्मकं मोहकार्यमित्यपेक्षा
श्रीः हे यां तदाह॥ ममेदमित्थं च तवेदमीदृशं तथाऽमेवं न परो न चान्यथा॥ विमूढता ह्यस्य जनस्य [illegible]त्यकल्पना सदा समे ब्रह्मणि
हृदये शिवे॥११॥ टीका॥ ममेदमिति॥ प्रथमं देहहृदये हंकारस्ततस्तद्ग्राह्यस्यार्थे कल्पनामिदमिति तत्र शोभनाऽशोभनाद्यध्यासः
वे इत्थमिति ततो ममेदं तवेदृशं तथा न ममेदमि[illegible]त्यादिकल्पना तथा परोऽप्येवं नैवमन्यथा वा नास्ति वा आस्ति वा इति मूढता
मम परस्य वा सुहृत्ता च तथा इत्येवं जनस्य जन्मादियोगिनो नायत्ता नातिरोहिता स्वस्वभावस्य या एवंविधा कल्पना(
सा सदा समे ब्रह्मण्ये हृदये शिवे परमानंदरूपे न च नास्त्येवेत्यर्थः॥११२॥ एवं विचित्रस्य संसारस्यासत्त्वज्ञानेन तद्वा
ननिवृ[illegible]त्यानिवृत्तिमुक्तां स्फुटयति॥ श्लोकः॥ यदद्वयं ज्ञानमतीव निर्मलं महात्मनां तत्र न शोकमोहता॥ तयोरभावे नहि द क
२९ कर्मजन्मनां भवेदयं वेदविदां विनिश्चयः॥१२१॥ टीका॥ यदद्वयमिति॥ अद्वयं मद्वयासाकारमतीव निर्मलमसंभाव
नाविपरीतभावनादिप्रतिबंधराहित्यं यत्तज्ज्ञानं तत्र तस्मिन्सति महात्मनां ब्रह्मभूतानां शोकमोहता संसारित्वं नास्त्ये
वेत्यर्थः॥ तथा च मंत्रः॥ तत्र को मोहः कः शोक एकत्वमनुपश्यत इति॥ तयोः शोकमोहयोरभावे तदुपलक्षितस्य त
त्कारणस्याज्ञानस्य निवृत्तौ बीजाभावे फलभावस्यायेन जन्मादि पुनर्नहि भवेदिति वेदार्थविदां विनिश्चय इत्यर्थः॥ त(
था च श्रुतिः॥ भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः॥ क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे॥१३॥ एवं मुक्तस्या
त्मविदः स्वरूपमाह॥ श्लोकः॥ सुषुप्तवज्जाग्रति यो न पश्यति द्वयं तु पश्यन्नपि चाद्वयत्वतः॥ तथा च कुर्वन्नपि निष्क्रि(

उप.स. यश्चयः सआसविन्नाम्स इतीह निश्चयः ॥१२॥ सुषुप्त्यादिनि ॥ जाग्रति विभ्रमावस्थायां स्वयं द्वैतप्रपंचं प्राग्वासनावशात्

२९ सन्नपि सुप्त्याप्तिवन्नापि विशेषतो न पश्यति ॥ किंतु सुषुप्त्यवस्थाविलीनप्रपंचं स्वस्वरूपेणैव पश्यतीति योजना तत्

प्रहेतुरद्वयत्वत इति ॥ द्वैतस्य बाधितत्वादित्यर्थः ॥ तथा चैवं पूर्वं स्नानशौचभिक्षाटनादि कुर्वन्नपि निष्क्रियो निर्विका ५

५ रोकत्वात्स्वभावाविर्भावात् ॥ एवंविधः सआसविद्विक्षेपदशायामप्यनुसन्धानसयाथाम्पर्दर्शनत्वाद्ब्रह्मविदामुत्तमोयमे

वेत्यर्थः शास्त्रार्थज्ञोपि यो व्यवहारकाले ज्ञातृत्वं कर्तृत्वा द्यभिमानवानित्यर्थः ॥ इतीत्थमिह वेदान्तशास्त्रो विनि

॥श्चयः ॥१३॥ श्रीमन्मायानुसा रेण स्वानुभवं प्रदर्श्येदानीमस्मिन्दर्शने परिनिष्ठितस्य कृतकृत्यताभवतीति दर्श

यन्परानुग्रहाय प्रकरणनिर्माणप्रवृत्तिरिति सूचयति ॥ श्लोक ॥ इतीदमुक्तं परमार्थदर्शनं मया हि वेदान्तवि

५ निश्चितं परं ॥ विमुच्यतेस्मिन्यदि निश्चितो भवेन्न लिप्यते व्योमवद्देहकर्मभिः ॥१४॥ टीका ॥ इतीदमुक्तमिति ॥ वे

दान्तविनिश्चितमित्युक्तदर्शनस्य परमार्थविषयत्वे प्रमाणमुक्तं व्योमवच्चेति ॥ विसंधिर्वृत्तपूरणार्थः ॥१४॥ इति

स्वरूपपरमार्थदर्शनप्रकरणं ॥१०॥ उपदेशसा ॥ ब्रह्मात्मैक्यज्ञानमात्रनिष्ठो मुच्यत इत्युक्तं तत्रोपपद्यते कर्मसाध्य

त्वान्मुक्तेः कर्मसहितज्ञानसाध्यत्वाद्वा न तथा ज्ञानस्य वेदान्तविनिश्चयत्वमुक्तं तदपि संदिग्धमनुमानादिनानु

२ पपन्नेरितीमामाशंकां परिहर्तुं प्रकरणान्तरमारभते ॥ श्लोक ॥ ईक्षितृत्वं स्वतः सिद्धं जन्तूनां च ततोन्यथा ॥ अज्ञाना

द्धि यतोन्यत्वं सदसीति निर्णयते ॥१॥ टीका ॥ ईक्षितृत्वमित्यादिना ॥ तत्रादौ तावन्मुक्तिः ज्ञानं च वेदान्तैः राम

क्यादेवनानुमानादिनेत्येतत्साधयति॥ अन्यत्वं सदसीदिति वर्त्यत इति॥ त्वं तत्स[...]द्वलक्षितं ब्रह्मैवासि न संसारी इति

वाक्योपदेशेनैव सच्छब्दार्थाद्ब्रह्मणोऽन्यत्वं जीवस्य निवर्त्यत इत्यर्थः॥ संसारिणो जीवस्याशुद्धस्य कथं तद्विपरीतब्रह्म

त्वं संभाव्यत इत्यत आह॥ ईक्षितृत्वमिति॥ सर्वेषामेव जन्तूनां प्राणिनां चिद्रूपमेवेक्षितृत्वं तत्स्वतः सिद्धं स्वाभा

विकं रूपं चकारः शंकानिवृत्त्यर्थः॥ कर्तृत्वभोक्तृत्वादेरपि स्वाभाविकत्वशंका न कार्या स्वरूपव्यभिचारादित्यर्थः॥

~~कर्तृत्वभोक्तृत्वादेरपि~~ कुतो ज्ञानादेवान्यत्वनिवृत्तिरूपा मुक्तिरित्यत आह॥ ज्ञानादिसन इति॥ ज्ञातियतो [...] म

न त्वमज्ञानानि[...]बंधनं परमार्थो न तत्त्वर्थः॥ अज्ञानकल्पितत्वात्तु ब्रह्मविपरीतरूपत्वस्य स्वतस्तु निर्लिप्तात्स्वभाव

भ्रम त्वादज्ञाननिवृत्तिलक्षणत्वाच्च मोक्षस्य च तत्त्वज्ञानमात्रापेक्षत्वात् ज्ञानस्य च यथोक्तवाक्यादेवोत्पत्तेर्न माना

30 तरं साधनांतरं वात्र मृग्यत इति भावः॥१॥ कर्मणो मोक्षहेतुत्वसंदेहे तं ज्ञानसाहाय्यत्वेनोपपद्यते भुक्तियुक्तिवि

लं रोधादित्याह॥ श्लोक॥ एताव[...]द्धमृतं नान्यत्किंचिदन्यत्सहायकं॥ ज्ञानस्य त्रिभुवच्छास्त्रं सलिंगं कर्म बाधते॥२॥ टी०

एतावद्धीति॥ एतावदेवेत्यमृतत्वमित्येतदमृतसाधनमात्मज्ञानमेवेत्येतावच्छब्देनावधारयती त्रिश्रुतिः

शास्त्रमुच्यते नतु ज्ञानस्य किंचिदन्यत्सहायभूतमस्ति त्रिभुवनं सलिंगं ससाधनं बाधत इति योजना॥ अहं कर्म

त्म तोऽज्ञानादूर्ध्वं कर्महेतुजात्याद्यभिमानाभावे कुतः कर्म यत् ज्ञानस्य मोक्षफले सहायभूतं भवेदिति भावः॥२॥

इदानीमीक्षितृत्वमित्यत्रोक्तं स्वाभाविकचिद्रूपत्वं प्रपंचयन् ज्ञानिनः कर्म न घटत इत्येतदुपपादयति॥ श्लोक॥

उप.स. सर्वेषांमनसोवृत्तमविशेषेणपश्यतः॥तस्यमेनिर्विकारस्यविशेषःस्यात्कथंचन॥३॥टीका॥सर्वेषामिति॥विशेषः॥
३० कर्तृत्वादिलक्षणोविहितकर्मसाधनजात्याद्यभिमानलक्षणश्चेत्यर्थः॥कथंचनेत्याक्षेपार्थोनकथंचनमेविकारःस्यादि
त्यर्थः॥कुतइत्यतआहाविशेषेणेतिअभिमानशून्यतयाकेवलंसाक्षिमात्रेणपश्यतइत्यर्थः॥३॥कथंमनोवृत्तंपश्यतस्सः ग
विशेषेणासेत्यपेक्षायांदृष्टान्तपूर्वकंतदुपपादयंश्चिदेकरसत्वमात्मनोनिगमयति॥श्लोक॥मनोवृत्तंमनश्चैवस्वप्नवज्जाग्र
तीक्षितुः॥संप्रसादेद्वयासत्वाच्चिन्मात्रःसर्वगोऽद्वयः॥४॥टीका॥मनोवृत्तमिति॥स्वप्नदशायांसवृत्तिकंमनएवपश्यत्या
त्मायथाबाह्यविषयाभावात्तथाजाग्रतिजागरणदशायांमनोवृत्तंमनःप्रचारंमनश्चतदाश्रयंपश्यतःकथंविशेषः॥ म
ना स्यादितिपूर्वश्लोकेऽन्वयः॥जाग्रद्दशायामपिविषयाकारवृत्तिमन्मनोअतिरेकेणनास्तिकिमप्युपलभ्यतइतिभा
वः॥नह्येवंविधमनोदर्शनमेवस्वाभाविकोविशेषइत्यतआहसंप्रसादइति॥संप्रसादेसुषुप्तिदशायांद्वयस्य
सवृत्तिकस्यमनसोसत्त्वाज्ज्ञत्वदर्शनमपिस्वाभाविकंनतुतद्द्वितीयमस्तिततोन्यद्विभक्तंयत्पश्येदितिश्रुतेः॥
तथाचात्माचिन्मात्रःसर्वगोपरिच्छिन्नोऽद्वयोनित्यइतिसिद्धमित्यर्थः॥४॥ननुयद्येवंतदाबाह्याभ्यन्तरद्वैतस्या
भावएवेतिउक्तंस्यात्तन्नोपपद्यतेप्रत्यक्षादिप्रमाणविरोधात्लौकिकवैदिकव्यवहारविलोपप्रसंगाच्चेतिचेन्ने
त्याह॥श्लोक॥स्वप्नःसत्योयथाबोधाद्देहात्मत्वंतथैवच॥प्रत्यक्षादेःप्रमाणत्वंजाग्रत्स्यादात्मवेदनात्॥५॥टी०॥
स्वप्नइति॥यथाआबोधात्प्रबोधपर्यंतंस्वप्नःसत्योलौकिकवैदिकव्यवहारास्पदतयावभासतेतथैवजाग्रज्जा
ग्रद्दवस्थायामपिदेहात्मत्वंप्रत्यक्षादेःप्रमाणत्वंचसर्वव्यवहारांगंस्यात्किंयत्पर्यंतमित्यतआहात्मवे समरु

दनाद्वैति॥आआत्म वेदनादितिपदच्छेदः आत्मतत्त्वसाक्षात्कारात्प्रागेवसर्वो व्यवहारस्तस्मिन्सति व्यवहाराभाव
इत्यस्यैवेतिभावः॥५॥अव्यवहार्यस्वरूपमाविष्करोति॥श्लोक॥ओमवत्सर्वभूतस्थोभूतदोषैर्विवर्जितः॥साक्षीचे
ताःगुणःशुद्धोब्रह्मैवास्मीतिकेवलः॥६॥टीका॥ओमवदिति द्वाभ्यां॥चेताचिद्रूपःसाक्षीतिसर्वभूतदोषराहित्येहे
तुःओमवत्सर्वभूतस्थइत्यसंगत्वमुक्तंसर्वभूतेष्वहमाकारवृत्त्याभिव्यक्तत्वापेक्षयासर्वभूतस्थइत्युच्यतेएतच्चाहमनु
भवंसूर्यश्चेतिवत्सर्वात्मत्वाभिनयाभिप्रायंद्रष्टव्यं॥शुद्धोज्ञानराहित्यःकेवलोवस्थात्रयराहित्यःब्रह्मैवपूर्णएवास्मीत्य व
र्थः॥६॥केवलत्वं व्यनक्ति॥श्लोक॥नामरूपक्रियाभ्योन्योनित्यमुक्तस्वरूपवान्॥अहमात्मापरंब्रह्मचिन्मात्रोहमद्व ६
यः॥७॥टीका नामरूपेति वाच्यवाचकतद्व्यापारात्मकप्रपंचहीनइत्यर्थः॥सुगममन्यत्॥७॥कथमद्वय
३ त्वमात्मनःसंगच्छतेअहंब्रह्मास्मीतिवदहंकर्तास्मीतिचानुभवस्यप्रमाणमूलत्वादिति॥ज्ञानकर्मसमुच्चय
वादिनोभेदाभेदमतानुसारिणस्तान्कुत्सयन्नद्वैतात्ममतंदृढयति॥श्लोक॥अहंब्रह्मास्मिकर्ताचभोक्ताचा
स्मीतियेविदुः॥तेनष्टाज्ञानकर्मभ्यांनास्तिकास्युर्नसंशयः॥८॥टीका॥अहंब्रह्मास्मीति॥विरुद्धार्थप्रतिपादक
त्वायोगाच्छास्त्रस्याविरुद्धंतत्त्वमनवगच्छन्तःकर्मकांडात्ज्ञानकांडाच्चबहिर्मुखत्वान्नास्तिकत्वमेवतेषांफलिष्य
तीत्यर्थः॥८॥ननुनिर्देशमात्रेणकथमद्वैतमतस्यसिद्धिस्तत्रप्रमाणस्यासंभवादित्यतआह॥श्लोक॥धर्माधर्मफ
लैर्योगइष्टोदृश्येयथात्मनः॥शास्त्राद्गुरूत्तमव्यस्यमोक्षोज्ञानात्तथेष्यतां॥९॥टीका॥धर्माधर्मेति॥आत्म

उप.स. ३१ नोधर्माधर्मफलैः सुखादिरूपैर्योगः संबंधः प्रमाणांतरैरदृष्टोपि यथाशास्त्रादेव पुण्येनैव पुण्येन कर्मणा भवति पापः
पापेनेत्यादेरिष्टोंगीकृतः शास्त्रार्थविद्भिरिति शेषः॥ तस्यात्मनो ब्रह्मत्वं ज्ञानादेव मोक्षश्चेति ब्रह्म वेद ब्रह्मैव भवति त
मेव विदित्वाति मृत्युमेति नान्यः पंथा विद्यतेयनायेत्यादिशास्त्रादिष्यतां तथा च भेदकर्मणोर्निंदनयोः शास्त्रतात्प
र्यविषयत्वायोगाच्छास्त्रानुसारिभिर्यथाशास्त्रमर्थः प्रतिपत्तव्य इति भावः॥१॥ नन्वात्मनो धर्माधर्मफलयोगः शास्त्रो
क्तो मानांतरविरोधाभावात्तथैवेति युज्यते न तथात्मनो ब्रह्म[illegible]त्वं प्रत्यक्षदृष्टकर्तृत्वादिविरोधादतः श्रुत्यनुभवयो
रविरोधाय भेदाभेदावादरणीयाविति चेत्॥ मैवं कर्तृत्वादि[illegible] प्रतिभासस्याध्यासत्वाच्छ्रुत्युक्ताद्वैतप्रतिपक्ष नू
स त्वानुपपत्तेरिति दृष्टांतमाह॥ श्लोकः॥ या महारजनाद्यास्ता वासनाः स्वप्नदर्शिभिः॥ अनुभूयंत एवेह ततोन्यः केवलो के
दृशिः॥ ५॥ या महारजनाद्या इति॥ तस्यैवैतस्य पुरुषस्य रूपं यथा महारजनं वासः इत्यारभ्य यथा सकृद्विद्युत्तमिति
तेन श्रुत्युक्ता या वासनास्ताः स्वप्नदर्शिभिरनुभूयंत एव यथैतस्याक्षरयोजना महारजनं हरिद्रा तया रंजितं वस्त्रा
दि महारजनं स्वप्नदशायां जाग्रद्वासनावासितस्य मनसो वातपित्तश्लेष्मदूषितरसपूर्णनाडीष्वनुगतस्याद्या
दिसमुद्बोधितानेकवासन[illegible]या जाग्रद्दृष्टार्थाकारेण परिणममानस्य हरिद्रारंजितपटादिरूपसदृशतया
भासमानस्य द्रष्टृदृश्यदर्शनतत्कारणादिभावेन नित्यं स्वप्नद्रष्टोपलभ्यमानत्वात्स्वप्नदृश्याभ्यो महारजनादि
श्र दृष्टवासनाभ्यो लिंगात्मसाक्षिणो [illegible] कर्तृत्वादीनां दृश्यत्वादनात्मध राम ३१

मंत्वमेनिवैनिश्चितमेवेहजाग्रदवस्थायामपिननः कर्तृत्वादिधर्मकाल्लिंगादन्यः केवलः शुद्धोदशिरात्मेत्यर्थः ॥१९॥
आत्मनःस्वप्नावस्थायांदृश्यविलक्षणत्वेनप्रतीतिमेवदृष्टांतेनस्पष्टयति ॥श्लोक॥ कोशादिवविनिर्मुक्तःकार्य
कारण वर्जितः ॥ यथासिर्दृश्यतेस्वप्नेतद्वद्बोद्धास्वयंप्रभः ॥२०॥ टीका॥ कोशादिवेति॥ इवशब्दोयथाशब्दार्थे
आसिरिवेतिसंबंधः॥ यथाशब्दोयथावदित्यर्थेयथासिःखड्गःकोशात्पृथक्कृतः स्वरूपेणदृश्यतेनतद्वद्बोद्धाआ
त्माकार्यकारणैर्वर्जितः कार्यकारणाकारमनसोलिंगात्पृथक्कृतः स्वप्नेयथावद्दृश्यते॥ दृश्यतइत्युक्तेविषयवद्
दृश्यत्वान्मिथ्यात्वमित्याशंक्याविशिनष्टिस्वयंप्रभइति॥ स्वमहिम्नैवप्रथतेनविषयतयेत्यर्थः॥ यद्वाकथमवग
म्यतेस्वप्नेकार्यकारणवर्जितइतिवीक्षायामत्रायंपुरुषःस्वयंज्योतिरितिश्रुतिसामर्थ्यादित्याह॥ स्वयंप्रभ
३२ इति॥ स्वयंप्रकाशइतिश्रुतिनिर्णीतइत्यर्थः॥ उपाधेःपृथक्स्वरूपेणावभासमानेऽसिदृष्टांतइतिवेधम्यशंका नन्
वकाशइतिद्रष्टव्यं ॥२१॥ आत्मनः कर्तृत्वादिप्रतिभासस्यस्वप्नप्रतिभासवन्मिथ्यात्वाच्छुद्धएवात्माब्रह्मैवेति
शास्त्रादविरोधेनैवप्रत्येतुंशक्यत्वान्नभेदाभेदकल्पनयामनःखेदनीयमितितात्पर्येसोपक्रमंवाक्यंप्रमाण
माह॥ श्लोक॥ आपेषात्मनिबुद्धस्यहस्तस्पर्शाभाविकंपदं॥ उक्तंनेत्यादिवाक्येनकल्पितस्यापनेतृणां॥२२॥
टीका॥ आपेषादिति॥ नंपाणिनापेषंबोधयांचकारसहोत्तस्थाविति श्रुतौसुप्तपुरुषोबृहत्पांडुरवासः षु
सोम राजन्नित्यादिभिर्नामभिरामंत्रितोनोत्थितःपाणिनापिष्यमाणउत्थितइतिनिर्धारितस्य

उप·स· न प्राणोइन्द्रियादिरूपात्लिङ्गसंघातविलक्षणः स्थूलसंघाताद्व्यन्य एवासौ इति प्रतिपन्नमतः एवजडविलक्षण
३२ त्वात्ज्ञानस्वभावः ॥ तस्यापेषा प्रतिबुद्धस्य ज्ञस्य त्वंपदार्थस्य स्वाभाविकं पदं परब्रह्मलक्षणमुक्तं केन नेत्या
न दिवाक्येन अथात आदेशो नेति नेत्यारभ्य सत्यस्य सत्यमित्यन्तेन प्राणा वै सत्यं तेषामेष सत्यमित्यनेन वाक्येनेत्य
र्थः ॥ किंविषयेण वाक्येन कार्यस्य कारणस्य मूर्तामूर्तद्वैतस्य नानाश्रयरूपस्यापनेतृणा प्रतिषेधकेन नेति नेती न
ति वीप्सया समस्तकारणकार्योपाधिप्रतिषेधद्वारा खण्डे ब्रह्मणि पर्यवसितेनेत्यर्थः ॥ १२ ॥ नेति
नेत्यादिशास्त्रेणा निषिध्यमानस्य कस्यचित्त्वं शुसे वैपपादितमित्याह ॥ श्लोकः ॥ महाराजादयो लोका मयि
त यद्वत्प्रकल्पिताः ॥ स्वप्ने तद्वदिदं विद्याद्रूपं वासनया सह ॥ १३ ॥ टीका ॥ महाराजादय इति ॥ स्वप्ने स्वप्नावस्थायां
महाराजादयो लोका यद्वन्मयि दृशात्मनि प्रकल्पितास्तद्वदेव वासनया लिङ्गात्मिकया सहेदं रूपं मूर्तं चैवामू
र्तं मयि कल्पितं विद्यात्तथा च [illegible] श्रुतिर्यत्रैषए
तत्सुप्तोऽभूद्य एष विज्ञानमयः पुरुष इत्युपक्रम्य स यत्रैतत्स्वप्नया चरति ते हास्य लोकास्तदुतेव महाराजो भव ति
उ त्युतेव महाब्राह्मण उतेवोच्चावचं निगच्छतीति निरुक्तशब्देन महाराजत्वादेः स्वप्नदृश्यस्याभासतां मध्ये निर्दिश्यैव
मेवैष एतत्प्राणान्गृहीत्वा स्वे शरीरे यथाकामं परिवर्तत इत्युपसंहरतीशरीरमध्य एव प्राणशब्दवाच्यलिं
गोपाधिमहाराजाद्याभासत्वाद्यात्मा वासनया च इतीनिर्दर्श्य यति अतो न स्वप्नोपलब्धं परमार्थमित्यर्थः ॥ रामर

श्रुतिः यत्रैष एतत्सुप्तः स्वप्न्या चरति ते नैव लोकाः इत्युप

तथाचवासना॥ अयलिंगशरीरसहितस्यैमूर्तरूपस्थूलस्यापिछ्गासनिकत्वेसिद्धेनत्वंतदृश्यत्वादुपपन्नमेवेतियुक्तमिति
तासयर्थः॥१३॥स्वप्नप्रपंचवज्जाग्रत्प्रपंचस्यापिप्रत्यगासनिकत्विनत्वेसिद्धेप्रत्यक्तत्वाभिन्नस्यकर्मासंभवःसिद्ध
इत्याह॥श्लोक॥देहलिंगात्मनाकर्त्रीवासनारूपिणाक्रियाः॥नेतिनेत्यात्मसरूपत्वान्नमेकार्याक्रियाक्वचित्॥१४॥
टीका॥देहलिंगेति॥क्रियाःकर्माणिदेहालिंगात्मनास्थूलसूक्ष्मदेहरूपेणतदभिमानेनतद्वासनामापन्नेना
त्मनाकार्याअनुष्ठेयानपुनस्ताभिरपेक्षेणतदभिमानहीनेनअसंभवादित्यर्थः॥किंलक्षणेनवासनारूपि
णावासनाःरूपयितुंसंचेतुंशीलमस्तीतिवासनारूपीतेनपुनःपुनःकर्मप्रवृत्तिनिमित्तेनौच्छिन्नेनेत्यर्थः॥इ	वि
दानींमेममनेतिनेतीत्यादिनोक्तात्मसरूपत्वाद्देहद्वयाभिमानाभावान्नक्वचित्स्वप्नेवाजागरेवा नक्रियाः
कार्याःकर्तंमात्मस्वभावतोविधितोवेत्यर्थः॥१४॥अज्ञानविकासिनेदेहाअभिमानादेवकर्मेतितस्याज्ञानम्
लत्वेसिद्धेनतेनमोक्षाशाकर्तव्येत्याह॥श्लोक॥नततोमृततात्राशास्तिकर्मणोज्ञानहेतुतः॥मोक्षस्य
ज्ञानहेतुत्वान्नतदन्यदपेक्षते॥१५॥टीका॥नतनइति॥ततस्तस्मात्कर्मणोहेतोरमृततायामोक्षभावस्याः
शाआशंसनंनास्तिकुतोज्ञानहेतुतोज्ञानहेतुकत्वादविवेकपूर्वकत्वात्कर्मणइत्यर्थः॥जडयोरज्ञानकर्म
णोविरोधाभावान्नाज्ञाननिवृत्तिरूपेमोक्षेकर्माशाकार्याब्रह्मात्मनावस्थानरूपस्यचपरमानंदाविर्भा

उप·स· नभिसेधाभावान्नलक्षणस्य मोक्षस्य चतुर्विधक्रियाफलविलक्षणत्वान्न तत्रापि कर्मापेक्षेति भावः॥ कर्मणः स्वतो
३३ मोक्षहेतुत्वाभावेपि मोक्षहेतुज्ञानसहायतया तद्धेतुर्भविष्यतीत्याशंक्याज्ञाननिवृत्तौ ज्ञानमात्रस्य समर्थत्वान्न
तत्र कर्मसहायतापेक्ष्यते नापीतरत्र तस्य स्वतःसिद्धत्वादित्यभिप्रेत्याह॥ मोक्षस्येति॥ ९५॥ यदि कर्मसाध्यममृत
त्वं स्यात्तर्हि स्वर्गादिवत्कृष्यादिफलवच्चानित्यं सभयं च स्यात् न चानित्यमभयं प्रतिष्ठां विंदते इत्यभयरूपत्व श्रुतिविरो
धाद्नोन्यदार्त्तमिति मोक्षस्वरूपादन्यस्यार्त्तत्वोक्त्यात् तस्यानार्त्तत्वपर्यवसानवचनविरोधाच्चेत्यभिप्रेत्याह॥ श्लोक॥
अमृतत्वं चाभयं नार्त्तं नेनेनीत्या सा प्रियो मम॥ विपरीतमतोन्यद्यन्यजेनत्साक्रियं ततः॥ ९६॥ टीका॥ अमृतत्वं चेति॥ चश
ब्दस्त्वर्थः॥ अमृतत्वमभयं नार्त्तमित्यर्थः॥ यद्यपि ब्रह्मरूपममृतत्वमुक्तलक्षणमकर्मसाध्यं तथापि जीवोन्यस्तत्कर्म
णैव लभेतेत्याशंक्य जीवस्य ब्रह्मणोन्यत्वाभावात्सैवमित्याह॥ नेतीति॥ यः प्रियो जायादिभ्यीस्यात्स्यदनया विभा
मनेसममात्मा स्वरूपभूतः॥ नेन जीवेनात्मनानुप्रविश्येत्यादिश्रुतेः॥ स च नेनेतीत्यपोढाशेषविशेषज्ञानिमद्रूप
त्वान्न तस्य कर्मप्राप्यममृतत्वमित्यर्थः॥ अनन्तकालात्मस्वभावाद्यदन्यद्देहबुद्ध्यागृह्यमाणं विपरीतं तद्दूयमाना
त्मभूतं तत्क्रियासहितं त्यजेत्तदभिमानं परित्यजेत्तत्स्मात्कारणादित्युपसंहारार्थः॥ न चायमात्मत्यागस्य वि
धिस्तस्या [illegible] नियोज्यत्वात्तस्य [illegible] अन्नेनियोगस्याहा विधिप्रत्ययानिर्देशा राम

इति द्रष्टव्यं ॥ ९६ ॥ ईक्षितृप्रकरणमेकादशं विवृतं ॥ ११ ॥ ननु यदि भोक्ता प्रियशब्दोक्तो निर्विशेषब्रह्मस्वरूप

सर्वो एव तर्हि लोको हमहमस्म्यात्मानमनुभवन्नपि ब्रह्माहमिति कथं नानुभवतीत्याशंकायां पदार्थतत्त्वपरिशोधनाभा

वापराधादेवेति तत्पदार्थशोधनप्रधानं प्रकरणमारभमाणः साभासांतःकरणाविवेकाद्याथात्म्येन स्वात्मानं

न प्रत्येतीति सर्वो लोक इति प्रथमं संदृष्टांतमाह ॥ श्लोक ॥ प्रकाशस्थं यथा देहं सालोकमभिमन्यते ॥ द्रष्टाभासं तथापि

तं द्रष्टाहमिति मन्यते ॥ १ ॥ टीका ॥ प्रकाशस्थमिति ॥ यथायं जनः स्फीतालोकमध्यगतं स्थूलं देहं ततो विलक्ष

भास्लोक णमपि तेनालोकेन व्याप्तत्वात्सालोकं विशिष्टमभिमन्यते न तथा द्रष्टाभासांचितं साक्षिचैतन्यव्याप्तमंतःकर

णं स चेतनं मन्यमानो हं द्रष्टेति साभासांचितमेवात्मानं मन्यते न तद्याथात्म्यं जानातीत्यर्थः ॥ अयं भावः ॥ यथा

विशेषेण सर्वत्र विप्रसृतमालोकं देहसंपर्कात्तदा[illegible]कारितमिव दृश्यमानं देहाभेदेन पश्यति लोकस्तथा

स्व सदा स्वरूपेणानवच्छिन्नप्रकाशोभावोप्यात्मांतःकरणसंपर्कात्तदाकाराकारि तदवभासनेदृश्यहं कर्ताहं

३५ भोक्तेत्येवमंतःकरणस्व[illegible]भा[illegible]वविशिष्टमेवात्मानमनुभवति लोको न शुद्धमिति ॥ १ ॥ एवमात्मनः

साभासांतःकरणाविवेकमुक्त्वा तद्द्वारेण देहपर्यंतमविवेकं दर्शयन्नात्माप्रतिपत्तिमेव लोकस्य दर्शय

ति ॥ श्लोक ॥ यदेव दृश्यते लोकेनेनाभिन्नत्वमात्मनः ॥ अपश्यन्नेनतो मूढस्तेनात्मानं न विंदति ॥ २ ॥ टीका ॥ यं

यदेवेति

म

उप·स· ३४ दे..नि॥ यदेवसाभासचित्ताविविक्ततयाहंकारास्यं दंप्राणेंद्रियस्थूलदेहपर्यंतंदृश्यमेनुभूयते लोके व्यवहार
भूमाविनियावत्॥ तेनप्राणादिदेहांतेनात्मनोऽभिन्नत्वंतादात्म्यंप्रपद्यते चित्तादिदेहपर्यंतंचिदाभासमनीते
ते स्तदविवेकात्संघातमेवात्मानंमन्येइत्यर्थः॥ यतएवंततस्तस्मान्मूढोदेहादे रात्मनश्चात्मान्यमध्यासकर्त्तासं
स्तेनमोक्षे नहेतुनात्मानंब्रह्मत्वेननविंदतीनभवतीत्यर्थः॥२॥ उक्तमर्थंदृष्टांतेनसाधयति॥ श्लोकः॥ दशमस्य
नयात्मत्वप्रतिपत्तिविदात्मनः॥ दृश्येषु तद्वदेवायं मूढो लोको न चान्यथा॥३॥ टीका॥ दशमस्येति॥ दशादिमा
णवकाः क्वचिन्नदींतीर्त्वापारंगताः संतोगणयामासुः कतिवयंस्मइतितत्रगणयित्वात्मात्मानंविहायनवैव
श गणयंतिसोतिप्रसिद्धिः॥ तत्रयद्वद्यथादशमस्यात्मनोमाणवकस्यगणयितुरविवेकात् यात्मत्वप्रतिपत्तिःनव
भ्योन्यमात्मानंनविंदतिनवैववयंदशमोनास्तीतिभ्रांतिरुपलभ्यतेइत्यर्थः॥ तद्वत्तथैवायंलोकोबुद्ध्यादिदृ
श्येष्वात्मतादात्म्यप्रतिपत्त्यामूढः शास्त्राचार्योपदेशहीनः॥ स्वात्मानमन्यथाप्रतिपद्यतेनचान्यथावैपरी
न त्येनबुद्ध्यादयोहंब्रह्मास्मीतिस्वरूपयाथात्म्यंनवेत्तीत्यर्थः॥३॥ ननुप्रत्यक्षानुभवस्यश्रुतेश्चाविरोधात्स्वग था
किम तएवकर्तृत्वादिधर्मवत्त्वंब्रह्मरूपत्वंचास्तु ..विवेककल्पनयामूढत्वमास्थीयतइत्यतआह॥ यद्य समिति
शास्त्राचार्योपदेशहीनोबुद्ध्यादिवैपरीत्येनात्मयाथात्म्यंनजानातीतितस्यपदार्थविवेकाभावान्मोक्षो
नोपपद्यतइतिसूचितंतथापि ..र्थविवेकेनकृतसंशास्त्रादु..प्रतिपन्नेसतिब्रह्माहमस्मीतिप्रसं राम ३४

समसमयत्वोर्मध्ये तारतम्याधीनौ स्यातां द्विवद्वत्वयमन्यतरस्य ध्यानमन्य
तरस्य ...बाध एव युक्तो नोभयोः

संख्यानादेवास्य यथास्यापरोक्षं तत्सोक्ष उपपद्यत इति प्रसंख्यानविध्यवसरमाशंक्य परिहरति ॥ श्लोकः ॥ त्वंकुरुष्व
न देवेति प्रत्ययावेककालिकौ ॥ एकनीडे कथं स्यातां विरुद्धौ न्यायतो वद ॥ ४ ॥ टीका ॥ त्वंकुर्विति ॥ एकनीडे एकस्मिन्
एका विषये विरुद्धौ प्रत्ययौ एककालिकौ वस्थाभाजौ कथं स्यातां मिति न्यायतो युक्तितो वदेत्यन्वयः ॥ न थावेकस्मिन्नात्म
कर्तृत्वा नि कुरु न देव त्वमिति कर्तृत्वप्रकारकविरुद्धबुद्ध्योः प्रामाण्यमित्यभिप्रायः ॥ ४ ॥ तर्हि दुःखित्वादिभिर्देहेन प्रत्यक्ष्यानु
भवेन शाब्दस्य ज्ञानस्य बाध्यत्वोपपत्तेस्तदीयस्थैर्यार्थं प्रसंख्यानविधिः स्यादित्यत आह ॥ श्लोकः ॥ देहाभिमानिनो
दुःखं नादेहस्य स्वभावतः ॥ स्वापवत्तत्प्रहाणाय तत्त्वमित्युच्यते दृशेः ॥ ५ ॥ देहेति ॥ यद्दुःखित्वादिकमात्मनः स्वा ॥ टी० ॥
न भाविकं स्यात्तदा तत्त्वज्ञानाभ्यासशतेनापि निवर्तयितुं शक्यते ज्ञानस्याज्ञानमात्रविरोधित्वात्तथा च तद्विधिर्निरर्थ
कः ॥ यदा त्वविद्याप्रयुक्तदेहाद्यभिमाननिबंधनं दुःखित्वादिकं तदा विद्यानिवृत्त्यैव तन्निवृत्तेर्विद्यानिवृत्तेश्च ज्ञा
नमात्रायत्तत्वान्न कर्मविध्यवकाश इति श्लोकतात्पर्यार्थः ॥ नादेहस्य देहाभिमानरहितस्येत्यर्थः ॥ नन्वहेतुः स्व
त भावे इति ॥ अदेहत्वमात्मनः स्वाभाविकं रूपमित्यत्र नियामकमाह ॥ स्वापवदिति ॥ सुषुप्तावि वेत्यर्थः ॥ दृशे
रात्मनस्तत्प्रहाणाय समूलाभिमाननिवृत्तये तत्त्वमिति श्रुत्योच्यते ॥ एवमात्रं बोध्यते न कर्मेत्यक्षरार्थः ॥ ५ ॥
स्वा तत्त्वमस्यादिवाक्याद् देहादिव्यतिरिक्तमात्मानमवगच्छतोऽपि दुःख्यहमिति प्रतीतेरनुवृत्तेर्नाभिमाननिबंधनं दुःख
मित्याशंक्य तद्दृष्टिः शास्त्रदर्शनस्याभासत्वान्मैवमित्याह ॥ श्लोकः ॥ दृशेश्छायायदारूढा मुखच्छायेव दर्शने ॥

पश्यतो नादेहस्येत्यनेन देहाभिमानव्यतिरेकेण दुःखमस्तीति ... व्यतिरेकेनाह स्वापवदिति ८

उप·स·
३९
पश्यंस्तं प्रत्ययं योगी दृष्ट आत्मेति मन्यते ॥६॥ टीका ॥ दृशेरिति ॥ दर्शयतीति दर्शनं दर्पणादि तस्मिन्मुखच्छाया मुखा
भासो मुखप्रतिबिंबरूपा यथारूढा भवति तद्वद्दृशेः प्रत्यगात्मनश्छाया आभासो यदारूढं यस्मिन्संक्रांतो भवति
तं प्रत्ययं प्रत्याययतीति प्रत्ययो ऽहंकारस्तं साभासमंतःकरणं पश्यन्नहमित्युपलभ्यमानो योगी अग्रहणाविद्या
दियोगवान्पुमानात्मा दृष्ट इति मन्यते ॥ यथा कश्चिद्दर्पणमुखस्वभावाविवेकाद्यथादृष्टदर्पणदोषमालिन्यात्स्वत्वा
द्विशिष्टमेव स्वमुखं मन्यते ॥ तथायं महाजन उपाधिदोषैरास्कंदितमिव तदविवेकादात्मानं पश्यन्नहं कर्ता दुःखी
त्यभिमन्यत इत्यर्थः ॥ तथा चाहमिति दर्शनस्य कस्मिन्नात्मविषयात्तु कं दुःखित्वस्याविवेकाभिमाननिबंधनत्वं सम्य मितिन
गात्मानं वाक्यादवगच्छतो दुःखित्वाद्यनुवृत्तिरुपपद्यते कदाचित्प्रतिभानस्य बाधितानुवृत्तिमात्रत्वादिति भा
वः ॥६॥ यदि साभासाहंकारमात्मानं पश्यन्न सम्यग्दर्शी कस्तर्हि सम्यग्दृगित्यपेक्षायामाह ॥ श्लोक ॥ तं च मूढं च
यद्यन्यं प्रत्ययं वेत्ति नो दृशेः ॥ स एव योगिनां श्रेष्ठो नेतरः स्यान्न संशयः ॥७॥ टीका ॥ तं चेति ॥ तमुपाधिभूतं प्रत्यय
महंकारं मूढं च मोहात्मकमविवेकमन्यं चोपाधिगतमाभासं दुःखादिकं वा यो वेत्ति साक्ष्यमेवेदं सर्वमिति सा
क्षित्वेनैव जानाति नैव दृशेरात्मनः साक्षिणः संबंधित्वेन वेत्ति य एवं विवेकमतिः स एव योगिनां युज्यंते ऽनेने
ति योगस्तत्त्वज्ञानं तद्वंतो येषां ते योगिनस्तेषां श्रेष्ठः प्रियतमः सम्यग्दृगित्यर्थः ॥ नेतरः पूर्वोक्तसाहंकारा
त्मदर्शी न संशयः संशयो न कर्तव्यः अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यतीति भगवद्वचनादित्यर्थः ॥७॥ राम

३५

सर्वस्यलोकस्यासत्वेनभासमानोप्यहंकारश्चेद्नासत्वेनत्यज्यते॥तदानंदन्यस्यत्वंपदार्थस्यादर्शनात्तत्वमस्यादिवाक्य
स्यनिरालंबनत्वापत्तिरित्याशंक्याहंकारादिविविक्तस्यत्वमर्थस्यश्रुत्यै वोपपादितत्वान्मैवमित्याह॥श्लोक॥विज्ञानेर्यस्तु
विज्ञानासत्वमित्युच्यतेयतः॥सस्यादनुभवस्तस्यततोन्योनुभवोमृषा॥८॥विज्ञानेरिति॥नहिविज्ञातुर्विज्ञातेर्विपरिलो
पोविद्यतेनविज्ञानेर्विज्ञातारंविजानीयाइतिश्रु.तोषष्ठ्यंतशब्दनिर्दिष्टायाबुद्धिवृत्तिरूपायाविज्ञानेरनित्यायाविज्ञा
रः नित्यविज्ञानस्वरूपेणज्ञातारंत्वंनविजानीयाइतियस्तुविज्ञानेर्विज्ञातिरूपोविषयभूतःसर्वसाक्षीसनियन्त्रःससर्वावभास
कएवंत्वमितित्वंशब्देनतत्त्वमसिवाक्यउच्यतेनाहंकारासत्तयायतोयस्मात्ततस्तमवलंब्यतत्त्वमस्यादिवाक्यप्रवृत्तेर्नानि
रालंबनत्वशंकावकाशइतिशेषः॥तस्यत्वंपदार्थस्यसएवश्रुत्युक्तप्रकारोनुभवःसम्यगनुभवःस्यात्ततोन्योबुद्धितत्
३८ स्थाभासविशिष्टरूपतयानुभवःमृषामिथ्याध्यासइत्यर्थः॥८॥नन्वविषयश्चेदात्माश्रुत्यानिवेद्यतेकथंतर्हितस्यानुभ
वोनुभवरूपत्वात्तस्यनानुभवापेक्षेतिचेन्न॥अन्यत्रानुभाव्यानुभवयोर्भेददर्शनादित्याशंक्यजडत्वाजडत्वाभ्यांवि
शेषोपपत्तेर्मैवमित्याह॥श्लोक॥दृशिरूपेसदानित्येदर्शनादर्शनेमयि॥कथंस्यातांततोनान्यइष्यतेनुभवस्ततः॥९॥
टीका॥दृशिरूपेति॥यस्यस्वसत्तायामप्रकाशव्यभिचारस्तस्यागंतुकज्ञानसापेक्षत्वात्स्वान्यज्ञानागमापायनिबंधने ले
दर्शनादर्शनेस्यातांसदादृशिरूपेज्ञानस्वरूपेमयिसत्योनित्येऽन्यनिरपेक्षसत्ताकेस्वरूपतोज्ञानतश्चानित्येइतियावत्॥
दर्शनादर्शनेकथंस्यातांनकथमपीत्यर्थः॥ततस्मात्कारणात्ततःस्वरूपादन्योनुभवोनेष्यतइतियोजना॥९॥

उप॰सू॰ उक्तमेव नित्यदृग्रूपत्वमात्मनः स्फुटयति॥ यद्वा सुखदुःखादियुक्तत्वेनात्मनो भावान्नानित्यदृशिमात्रत्वमित्याशंक्याह॥

३६ श्लोक॥ यस्त्वस्य तापो रवेर्देहे दृशेः स विषयो यथा॥ सत्त्वस्थस्तद्वदेवेह दृशेः स विषयस्तथा॥१०॥ टीका॥ यस्त्वस्य तापइति॥
रवेस्तापो देहे भवन् यस्त्यो यस्य देशस्थितो भवति स तापो यथा स्वाश्रयप्रदेशविशिष्ट एव दृशेरात्मनो विषयस्तद्वदेवे
ह व्यवहारकाले सत्त्वस्थोऽन्तःकरणस्थ एव भवति स सुखदुःखादिरूपस्तापस्तथा स्वाश्रयान्तःकरणसहित एव दृशेर्वि
षयो तो न दृगात्मस्थ भवेन्नित्यर्थः॥ अतस्तापस्यान्यधर्मत्वेनैवानुभवादात्मा नित्यचैतन्यमात्रस्वभाव एवेति भावः॥
अथवा देहे भवन् रवेस्तापो यस्त्यो यस्मिन् देहदेशे स्थितः स देह एव तापविशिष्टस्तत्सोऽहमिति मन्यमानस्य दृशो लौ
किकस्यात्मनो विषयो यथा तद्वदेव विषयसंपर्कजनितः सुखदुःखादितापः सत्त्वस्थोऽन्तःकरणस्थोऽपि सोऽन्तःकरणा ३
धि त्मः सुखादितापविशिष्टस्तथैव दृशोः साक्षिणो विषय इत्यर्थः॥ तथा च सुख्यहमित्याद्यभिमानस्य देहतापे तत्तदध्या
सात्तप्तोऽहमित्यभिमानवत् स्वद्रष्टृयान्तःकरणाध्यासनिबंधनत्वाल्लौकिको दुःखादिमत्तया आकेदापि न भास
त इति भावः॥१०॥ आत्मनः सुखाद्युत्थान्तःकरणसंबंधाभावं स्फुटयन् विविक्तस्वरूपमनुसंधत्ते॥ श्लोक॥ प्रति ८
षिद्धेदमंशो ज्ञः खमिवैकरसो ह्ययः॥ नित्यमुक्तस्तथा शुद्धः सोऽहं ब्रह्मास्मि केवलः॥११॥ टीका॥ प्रतिषिद्धेति स्पष्टार्थः॥११॥
यस्मादेवं विचार्यमाणोऽहं ब्रह्मैव तस्मात्तत्साक्षिरूपस्य मम कुत्रापि स्वरूपभेदोस्तीत्यद्वयात्मतत्त्वमाविष्करोति॥
श्लोक॥ विज्ञातुर्नैव विज्ञाता परो मे संभवत्यतः॥ विज्ञाताहं परो मुक्तः सर्वभूतेषु सर्वदा॥१२॥ टीका॥ विज्ञातु
रिति॥ सर्वविज्ञानरूपादात्मनोऽन्यो यतः परोऽप्यपकोऽपि ज्ञाता नैव संभवति॥ अतोऽहमेव परो विज्ञाता सर्व रामः ३६

भूतेषुस्थावरजंगमेषुसर्वदा एवंसर्वविज्ञेयतद्धर्मरहितत्वान्मुक्तइत्यर्थः॥५२॥एवंश्रुत्युपदेशात्सर्वत्रसर्वदाद्वयमा
त्मानमनुसंदधानस्यापिब्रह्मविदहमस्मीत्यभिमानात्स्यात्सविशेषत्वमित्यतआह॥श्लोक॥योवेदालुप्तसद्दृष्टेत्वमात्म
नोकर्तृतांतथा॥ब्रह्मवित्वंतथामुक्त्वासआत्मज्ञोनचेतरः॥५३॥टीका॥योवेदेति॥योब्रह्मवित्वंमुक्त्वाब्रह्मविदहम
स्मीत्यभिमानंत्यक्त्वायथाश्रुत्युक्तंतथात्मनोलुप्तचिन्मात्रतयाद्दृष्टृत्वंतथाकर्तृतांचवेदसआत्मज्ञस्तत्त्वब्रह्मविन्नचे आत्मज्ञ
तरोयोभिमानलेशमपिभजतइत्यर्थः॥५३॥ननुब्रह्मात्मज्ञानस्यात्मनिविद्यमानत्वात्कथंब्रह्मवित्त्वाभिमान
त्यागोनोनात्यंतंनिर्विशेषत्वमित्यतआह॥श्लोक॥ज्ञातैवाहमविज्ञेयःशुद्धोमुक्तःसदैत्यपि॥विवेकीप्रत्ययोबु विवेकी
टी॰॥ द्धेर्दृश्यत्वान्नाशवानुयतः॥५४॥ज्ञातैवेति॥ज्ञातैवाहमित्यादिरूपोयोविवेकवान्विविक्तात्मनिष्ठइतियावत्
३५ प्रत्ययोबुद्धेर्बोधेद्धायावृत्तिरूपःसदृश्यत्वात्साक्षिभास्यत्वान्नाशवान्नश्यतेअतोयस्मात्तस्मान्नास्तिब्रह्म व
विदोभिमानलेशस्याप्यवकाशइत्यर्थः॥यथाकतकबीजरजःकलुषितेजलेप्रक्षिप्तंजलगतसकलरजोविलो के
पयत्स्वयमपिविलीयमानं [illegible] सलिलमनाविलंकरोतितथायथोक्तविवेकबुद्धिवृत्तिरपिपरप्र
त्यगात्मनिसंसिद्धातद्गतसकलविशेषमुन्मूल्यतीस्वयमप्युन्मूलिताप्रत्यगात्मानंनिरस्तसमस्तविशे
षम.नाविलमापादयतीतिभावः॥५४॥नन्वात्मचैतन्यप्रतिभासोपिनाशवानात्मप्रकाशत्वात्प्रत्ययबुद्धिवृत्त्य
ति यवदितिचेत्तत्रैवं॥काककाथीनात्मलाभत्वस्योपाधित्वादित्याह॥श्लोक॥अलुप्तत्वात्मनोदृष्टेर्नैसाघाकार

उप॰सं केर्यतः॥ द्रष्टृत्वयाथात्म्यया दृश्याज्जन्यतास्यात्म कल्पिता॥१५॥ टीका॥ अस्तुत्वेनेति॥ उपाधेः साधनमापकत्वमा
३२ या शंक्यमत्याह॥ द्रष्टृत्वं चेति॥ अस्यात्मस्वरूपाया दृष्टेर्जन्यता तु द्रष्टृत्वयाथात्म्यया बुद्धिवृत्तिरूपयात्मस्वरूपदृष्टेर्विशे
षाकाराभिव्यक्त्युपाधिभूतया कल्पिता आरोपिता घटजन्मना घटाकाशजन्मवदित्यात्मनः साधनमाप
कत्वमित्यर्थः॥१५॥ तदेवमात्मन्यभिचाराद्विकल्पकाश्रयत्वनित्यत्वाद्यो वेदात्मस्वरूपदृष्टेर्नित्यत्वमित्युक्तोक्तं नित्यस्व ६ श्री
रूपत्वमुपपाद्याकर्तृत्वं तथैवोक्तं निर्विकारत्वमुपपादयति द्वाभ्यां॥ श्लोक॥ देहात्मबुद्ध्यपेक्षत्वादात्मनः
कर्तृता मृषा॥ नैव किंचित्करोमीति सत्या बुद्धिः प्रमाणजा॥१६॥ टीका॥ देहात्मबुद्धीति॥ देहात्मबुद्धिर्मि
थ्याबुद्धिस्तत्पूर्वकत्वात् कर्तृत्वादिरात्मनो मृषा नैव किंचित्करोमीत्यकर्तात्मबुद्धिर्निष्कलं निष्क्रियं शा
न्तमित्यादिप्रमाणजातः सत्या देहात्मबुद्धेरप्रमाणजाया बाधिकेत्यर्थः॥१६॥ इतोपि कर्तृत्वमात्मनो
न परमार्थमित्याह॥ श्लोक॥ कर्तृत्वं कारकापेक्षमकर्तृत्वं स्वभावतः॥ कर्ता भोक्तेति विज्ञानं मृषैवेति सुनि
श्चितं॥१७॥ टीका॥ कर्तृत्वं कारकापेक्षमिति॥ असंगे निरवयवे आत्मनि कारकसंसर्गस्य परमार्थतोनुप
पत्तेरकर्तृत्वस्य स्वाभाविकत्वात् कर्ता भोक्तात्मेति विज्ञानं मृषैव न परमार्थ इति सुनिश्चितं नित्यनिर्मलरूप
मात्मेत्यर्थः॥१७॥ तदेवं यादृशोधितपदार्थतत्त्वस्य वाक्याद्ब्रह्मास्मीति निर्विवादे विज्ञाने जाते सति नियो
ज्योहमिति बुद्धेरुन्मूलित [illegible] नुमानाभ्यां स्वरूपे राम ३२

वगतेसति॥ नियोज्योहमितिह्येषासत्याबुद्धिः कथंभवेत्॥१८॥ टीका॥ एवंशास्त्रानुमानाभ्यामिति॥ शास्त्रवि
ज्ञानैर्यस्तु विज्ञातासत्वमित्युच्यते यतः इत्यत्र दर्शितं यत्स्वस्ता पौरुषे दैहेह इत्यत्रोक्तमनुमानं ताभ्यामित्यर्थः॥१८॥
ब्रह्मविदो नियोज्यत्वादिबुद्धिर्नैवभवतीत्यत्र निर्विकारत्वादिकंहेतुंवदन्प्रकरणार्थमुपसंहरति॥ श्लोक॥ यथास टीका
र्वांतरंव्योमव्योम्नोप्यभ्यंतरोह्यहं॥ निर्विकारोचलः शुद्धो जरो मुक्तः सदाद्वयः॥१९॥ यथासर्वांतरमिति॥ इति प्रका १९
शप्रकरणंसुदर्शितं॥ ॥ ॥ नदेवंपदार्थतत्त्वपरिचयाभावादेववाक्यार्थप्रतिपत्तिर्जनस्येतितत्परिचयमा
त्रादेववाक्यात्वाक्यार्थयाथात्म्यावभाससंभवेश्रवणादिविधिरनर्थकोनुपपन्नश्चेत्युक्तमिदानींपूर्वप्रक
रणान्तेनिर्विकारोचलः शुद्ध इतियदुक्तमात्मनः शुद्धत्वमचलत्वंचतत्स्फुटीकर्तुंप्रकरणांतरंप्रस्तौति॥ ॥
[illegible] ॥श्लोक॥ अचक्षुष्ट्वान्नदृष्टिर्मेतथाश्रोत्रस्य काश्रुतिः॥ अवा
क्त्वान्नतुवक्तिःस्यादमनस्त्वान्मतिः कुतः॥२१॥ टीका॥ अचक्षुष्ट्वादिति॥ दृष्टिशब्देनचक्षुरिंद्रियद्वारक
जा बुद्धिवृत्तिर्बहिःप्रसृतारूपादिविषयोपरंजितोनातिक्रियात्मकोच्यते सादृष्टिर्मेनास्तिमद्विकारतयामद्
र्म्भूतासानभवतीत्यर्थः॥ तत्रहेतुरचक्षुष्ट्वादिति॥ चक्षुर्हिदेहदेवताश्रितंभौतिककरणंनमदाश्रित
मित्यन्वयव्यतिरेकाभ्यां निश्चितमितिनहेत्वासिद्धिशंकाएवंश्रुतिरित्यादिषुयोज्यं॥ तथाचतत्तदिं का
द्रियद्वारकबुद्धिवृत्तिरूपदृश्यादिक्रियाहीनत्वात्मात्मनोचलत्वंशुद्धत्वंचेतिभावः॥२१॥ तथाकर्तृ

उप·स· ३८ त्वज्ञानात्वविकारहेतुप्राणबुद्ध्योरभावादपिशुद्ध इत्याह ॥ श्लोक ॥ अप्राणस्यनकर्मास्तिबुद्ध्य. भावेनवेदिता ॥ वि
द्याविद्येततोनस्तश्चिन्मात्रज्योतिषोमम ॥ २ ॥ टीका ॥ अप्राणस्येति ॥ चिन्मात्रज्योतिषःसदाप्रकाशमानचिद्
स रूपस्यविद्याविद्येतानस्तातो ज्ञानाज्ञानेवानस्तस्तयोरपिबुद्ध्यवस्थाविशेषत्वादात्मनःबुद्ध्यभावादिति
सिद्धाशुद्धतेत्यर्थः ॥ २ ॥ उक्तधर्मजातस्यासम्भवेनशुद्धत्वादिसिद्धावशरीरत्वमेवहेतुरित्यभिप्रेत्यचिन्मात्र
ज्योतिःस्वरूपंविशेषणैर्विशदयति ॥ श्लोक ॥ नित्यमुक्तस्यशुद्धस्यकूटस्थस्याविचालिनः ॥ अमृतस्याक्षरस्ये
वमशरीरस्यसर्वदा ॥ ३ ॥ नित्येमुक्तस्येति ॥ टीका ॥ विद्याविद्येनस्तइति पूर्वेणान्वयः ॥ शुद्धत्वान्नित्यमुक्तत्वम
विचालित्वात्कूटस्थत्वमक्षरत्वादमृतत्वमिति विशेषणानांयोजना ॥ तत्रापिहेतुरशरीरस्येतितनहिश रीर
संबंधमंतरेणात्मनोऽशुद्धिचलनक्षरणानिनिरूपणपथमवतरंति अतःसदैवाशरीरत्वात्सर्वदाशुद्धइत्य
र्थियोज्यं ॥ ३ ॥ आत्मनःषडूर्मिसंबंधाभावादपिसिद्धशुद्ध तेत्याह ॥ श्लोक ॥ जिघ. त्सायाःपिपासायाःशो
कमोहौजरामृती ॥ नविद्येतेशरीरत्वानूओमवद्व्यापिनोमम ॥ ४ ॥ जिघत्सेति ॥ खादितुमिच्छाजिघत्
सापातुमिच्छापिपासाअन्यस्पष्टसिद्धं ॥ अत्राशरीरत्वादित्युपलक्षणंअप्रा. णत्वादमनस्त्वाच्चेत्यर्थः ॥
तथाचोक्तं ॥ प्राणस्यक्षुत्पिपासेद्वेमनसःशोकमोहकौजरामृत्यूशरीरस्यषडूर्मिरहितःशिवइति ॥ ४ ॥ राम· ३८

इदानीमनुक्तसकलेंद्रियवृत्तिप्रतिषेधोपलक्षणतया स्पर्शरसनसंबंधप्रतिषेधाविर्भावतिरोभावही[illegible]
नतया विशुद्धचिद्रूपत्वमुक्तमुपसंहरति॥श्लोक॥अस्पर्शत्वान्नमे स्पृष्टिर्नोजिह्वात्वाद्रसज्ञता॥नित्यविज्ञानरूपस्य
ज्ञानाज्ञानेनमेसदा॥५॥टीका॥अस्पर्शत्वादिति॥स्पर्शनेंद्रियरहितत्वादित्यर्थः॥५॥आत्मनोदृश्याद्योनसंती
त्युक्तेर्थेउपपत्तिमाह॥श्लोक॥यातुस्यान्मानसीवृत्तिश्चाक्षुषारूपरंजना॥नित्यमेवात्मनोदृष्ट्यानित्ययादृश्यते
हिसा॥६॥टीका॥यातुस्यादिति॥चाक्षुषा चक्षुर्द्वारजनितारूपरंजनारूपाकाराकारितायातुमानसीवृत्तिःस्यात्
सापिद्रष्टुर्भवतीत्यर्थः एवंविधावृत्तिरात्मनित्यस्वरूपया नित्ययादृष्ट्या चैतन्यप्रकाशलक्षणया नित्ययानित्यमेवदृ

श्यते प्रकाश्यते हि प्रसिद्धमनुभवसिद्धमेवैतदित्यर्थः॥६॥तथाचनदृश्याद्यश्चिदात्मीयास्तद्दृश्यत्वाद्योयेनदृ
श्यतेनेनसनदृश्योयथारूपादिरिति [illegible] सिद्धमात्मनोदृश्यादिराहित्येनशुद्धत्वादीत्यभिप्रेत्यचक्षुर्द्वारकवृत्तावुक्तन्या
यंवृत्त्यंतरेष्वतिदिशति॥श्लोक॥तथान्येंद्रिययुक्तायावृत्तयोविषयांजनाः॥स्मृतीरागादिरूपाचकेवलांतर्मन
स्यपि॥७॥टीका॥तथेति॥विषयांजनाः विषयोपाधिकाः विषयाकारा इतियावत्॥याचकेवलाचक्षुरादिद्वा
रनिरपेक्षाअंतर्मनसिशरीरांतर्वर्तिनिचित्ते स्मृतिःरागादिरूपासापिपूर्वोक्तयासदृष्ट्यादृश्यतेइत्यन्वयः॥७॥
किंचस्वप्नावस्थायांविद्यमाना मनःपरिणामरूपाः विषयाकारावृत्तयस्तत्तोप्यतिरिक्तस्यैवद्रष्टुर्दृश्याः यथासंप
तिपन्नास्तथाजाग्रद्दृश्या अपिदृश्यत्वात्स्वव्यतिरिक्तस्यैवद्रष्टुर्दृश्या इत्याह॥श्लोक॥मानस्यस्तद्वदन्यस्वप्न

इयं नेस्वप्नवृत्तयः ॥ द्रष्टुर्दृष्टिस्ततो नित्या शुद्धानंता च केवला ॥८॥ टीका ॥ मानस्य इति ॥ मानस्यः स्वप्नवृत्तयोऽस्य स
साक्षिणो दृश्यं ते दृश्यत्वेन वा विपरिवर्तंत इत्यर्थः ॥ तद्द्रष्टा यद्वृत्तय इत्यर्थः ॥ सर्वदृष्टीनां कूटस्थदृष्टिभास्यत्वे सिद्धे
फलितमाह ॥ द्रष्टुरिति ॥८॥ कूटस्था चेदात्मदृष्टिरिष्टा कथं तत्रान्यथा प्रथेत्याशंक्य वृत्तिमदंतःकरणाविवेकादे
वेत्याह ॥ श्लोक ॥ अनित्याऽसाऽविशुद्धेति गृह्यते त्राविवेकतः ॥ सुखी दुःखी तथा चाहं दृश्ययोपाधिभूतया ॥९॥ टी
का ॥ अनित्येति ॥ अविशुद्धेति छेदः ॥ उपाधिभूतया दृश्यया दृष्ट्यासहाविवेकतो विवेकाग्रहाद्व्यवहारभूमौ
सानित्याशुद्धा चात्मदृष्टिरनित्याविशुद्धेति चय हातेइतियोजना ॥ तथाहं सुखी दुःखीति च मन्यते इत्युत्तरश्लो
कगतेनान्वयः ॥९॥ अविवेकनिबंधनान्मिथ्याभिमानादेव संसारगामीत्युक्तमेव स्फुटयति ॥ श्लोक ॥ मूढ
या मूढ इत्येवं शुद्धया शुद्ध इत्यपि ॥ मन्यते सर्वलोकोऽयं येन संसारमृच्छति ॥१०॥ टीका ॥ मूढयेति ॥१०॥ कथं
तर्हि संसारनिवृत्तिरित्यपेक्षायां तदुपायं ब्रुवन्मुमुक्षुं शिक्षयति ॥ श्लोक ॥ अचक्षुष्ट्वादिशास्त्रोक्तं सबा
ह्याभ्यंतरमजं ॥ नित्यमुक्तमिहात्मानं मुमुक्षुश्चेत्सदा स्मरेत् ॥११॥ टीका ॥ अचक्षुष्ट्वादिति ॥ इह शा
थिनां मध्ये कश्चिन्मुमुक्षुश्चेत्स्यात्तर्हि स्वमात्मानं मुक्तरूपं सदा स्मरेत् ॥ श्रुत्याचार्योपदिष्टमनवरत
मनुसंदधीतेति योजना ॥११॥ यदात्मनश्चक्षुरादिराहित्यं प्राक्प्रसिद्धवदुक्तं तत्र प्रमाणमाह ॥ श्लोक ॥ अ
चक्षुष्कमश्रोत्रमवागमन इत्यादि च बृहदारण्यके यथा अरूपमुक्तं तथा मुंडकेऽप्युक्तमित्याह ॥ प्राणइ
ति ॥१२॥

अचक्षुष्ट्वादिशास्त्रात्सर्वनेंद्रियाणि सरामम अप्राणो ह्यमनाः शुभ्र इति चाथर्वणे पर्व १२ टिका २

[illegible] ॥ आत्मनो निर्विशेषत्वे श्रुत्यंतरमुदाहरति ॥ श्लोक ॥ शब्दादीनामभावश्च श्रूयते मम काठके ॥
अप्राणो ह्यमना यस्मादविकारी सदा ह्यहं ॥ १३ ॥ टीका ॥ शब्दादीनामिति ॥ शब्दमस्पर्शमरूपम
व्ययं तथारसं नित्यमगंधवच्च यत् ॥ अनाद्यनंतं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात्प्रमुच्यत इति का
ठके श्रूयत इत्यर्थः ॥ उक्तं प्रमाणमनूद्य फलितमाह ॥ प्राण इति ॥ १३ ॥ [illegible] ॥
अधिकारित्वनिश्चयफलमाह ॥ श्लोक ॥ विक्षेपो नास्ति तस्मान्मे न समाधिस्ततो मम ॥ विक्षेपो वा
समाधिर्वा मनसः स्याद्विकारिणः ॥ १४ ॥ टीका ॥ विक्षेप इति ॥ तस्मादविकारित्वादित्यर्थः ॥ ततो वि
40 क्षेपाभावादित्यर्थः ॥ विक्षेपनिघ्ननिरूपत्वात्समाधेस्तदभावे तदभावः ॥ कस्य तर्हि समाधिविक्षे
पाविति पेक्षायां विकारवत एवेति वदन्नविकारिणस्तदभावं द्रढयति ॥ विक्षेपो वेति ॥ १४ ॥ मनो
वद्विकारित्वाद्विकारि मनस्तादात्म्याद्वा विक्षेपसमाधी आत्मनि संभाव्येयातां तदुभयाभावात्तो
नास्तीत्याह ॥ श्लोक ॥ अमनस्कस्य शुद्धस्य कथं तत्स्याद्द्वयं मम ॥ अमनस्त्वमविकारित्वं विदेहव्यापि
नो मम ॥ १५ ॥ टीका ॥ अमनस्कस्येति ॥ शुद्धस्याविकारिण इत्यर्थः ॥ कथममनस्कत्वमविकारि
त्वं चेत्तत आह ॥ अमनस्त्वाविकारित्वे इति ॥ विदेहश्चासौ व्यापी चेति विदेहव्यापी तस्येति विग्रहः ॥

उप·स·
४०

विदेहत्वादमनस्कत्वंमायित्वादविकारित्वंचे[illegible]त्यर्थः॥६५॥कथंनाहिजिज्ञासावस्थायांसमाधादिकं
कर्त्तव्यमितितेबुद्धिरासीदितिनत्राह॥श्लोक॥इत्येतद्यावदज्ञानंतावत्कार्यममाभवत्॥नित्यमुक्तस्य नेदानीं
शुद्धस्य[illegible]चसदामम॥६६॥टीका॥इत्येतदिति॥सदानित्यमुक्तशुद्धस्यापिममयावत्पर्यंतमे
तन्नित्यशुद्धत्वादिविषयमज्ञानमासीत्तावन्ममकार्यंसमाधानादिकर्तव्यमभवन्नेदानीतज्ज्ञान
तःकृतमस्तीत्यर्थः॥६६॥इदानींकस्मात्समाधानादिनकर्तव्यमित्यपेक्षायांतद्धेत्वभावादित्याह॥॥
श्लोक॥समाधिर्वासमाधिर्वाकार्यंवान्यत्कुतोभवेत्॥मांहिध्यात्वावबुध्यावममंतेकृतकृत्यतां॥६७॥
भवे टीका॥समाधिर्वेतिकुतोऽन्यमेतिशेषः॥कुतोनभवेदित्यत्रहेतुमाह॥मांहीति॥हियस्मान्मांप्रत्य
गेकरसंब्रह्मध्यात्वाविचार्यबुध्वासाक्षात्कृत्यैकत्वेनामन्यन्तेमुमुक्षवइतिशेषः॥तथाचश्रुतिः॥ कृत
मा एषनित्योमहिमाब्राह्मणस्यनकर्मणावर्धतेनोकनीयानिति॥यस्त्वात्मरतिरेवस्यादात्मतृप्तश्च
मानवः॥आत्मन्येवचसंतुष्टस्तस्यकार्यंनविद्यतइतिस्मृतेश्च॥तस्मादज्ञानाभावान्नास्तीदानीं
किमपिकर्तव्यमित्यर्थः॥६७॥ननुयद्यपियथोक्तात्मविदःसमाध्यादिकर्तव्यंनास्तितथाप्यात्मनो
ब्रह्मत्वंसंपाद्यंप्रपंचस्यचविलयःकर्तव्योवाविद्यतइत्याशंक्याब्रह्मरूपत्वस्यनित्यसिद्धत्वात्प्रपं
चस्यचाज्ञानमात्रविलासित्वात्तस्यज्ञाननिवृत्तिसमयएवचाधिष्ठानात्मनानावतिष्ठतेनवाचेनदनु रामः ५

छेयमपरशिष्यंनइत्यभिप्रेत्याह ॥ श्लोक ॥ अहंब्रह्मास्मिसर्वोऽस्मिशुद्धोबुद्धोऽस्म्यनंतःसदा ॥ अजःसर्वतए
वाहमजरश्चाक्षयोमृतः ॥ ३८ ॥ टीका ॥ अहंब्रह्मास्मीति ॥ सदेतिब्रह्मास्मीत्यादिषुसर्वेषुविशेषणेषुयो
ज्यं ॥ अनंतोबंधहीनः ॥ सर्वतइतिचपदमजोऽक्षयइत्युभयत्रयोज्यं ॥ जन्मक्षयहेतुरहितइत्यर्थः ॥ ३८ ॥ न
नुभातिदेहंचेननभेदेभासमानेकथंब्रह्मास्मीतिप्रतीतिःपूर्णतानुभवःइत्यतआह ॥ श्लोक ॥ मदन्यःसर्वभूते
षुबोद्धाकश्चिन्नविद्यते ॥ कर्माध्यक्षश्चसाक्षीचचेतानित्योगुणोज्झितः ॥ ३९ ॥ टीका ॥ मदन्यइति ॥ उक्ते
र्थेप्रमाणमाहकर्माध्यक्षइति ॥ एकोदेवःसर्वभूतेषुगूढःसर्वव्यापीसर्वभूतांतरात्मा ॥ कर्माध्यक्षःस
र्वभूताधिवासःसाक्षीचेताकेवलोनिर्गुणश्चेतिश्रुत्यावेकस्यैवसर्वभूतांतरात्मत्वोपपादनाद्देहप्रति
भानस्याकाशभेदभानवदुपाधिनिबंधनत्वादात्मांतरशंकेतियुक्तंपूर्णब्रह्मात्मानुभवनमित्यर्थः ॥ ३९ ॥
अहंब्रह्मास्मीत्यत्रोक्तमात्मनोब्रह्मत्वमुपपादितंसर्वोऽस्मीत्युक्तंतुनाधा[illegible]यांसामानाधिकरण्याभिप्रा
यमित्युपपादयति ॥ श्लोक ॥ नसत्त्वाहंनचासत्त्वंनोभयंकेवलःशिवः ॥ नमेसंध्यानरात्रिर्वानाहर्वासर्व
दादृशः ॥ ४० ॥ टीका ॥ नसत्त्वाहमिति ॥ सत्प्रत्यक्षयोग्यंपृथिव्यप्तेजोरूपंभूतत्रयंअसत्तूप्रत्यक्षायोग्य
स्वभूतनिर्दिष्टंवाय्वाकाशात्मकंभूतद्वयंउभयंपंचभूतपरिणामात्मकंशरीरसंस्थानंएतत्सर्वनाहं
मित्युक्तेनेतिनेतीतिमध्येपरोऽप्यनिषद्धत्वान्मदन्यत्वमपिचासत्त्वादहमेवेदंसर्वमित्युक्तमेवतो

उप॰स॰ ४१ मित्यर्थः॥ केवलः सर्वविशेषशून्यः शिवो निस्त्रैगुण्यः संध्यादिकालविशेषयोगात् कथं केवलत्व
मित्यत आह॥ न मे संध्येति॥ तत्र हेतुः सर्वदा दृशेरिति अलुप्तप्रकाशात्मत्वादित्यर्थः॥ यद्वा संध्यादि
शब्दैः क्रमेण स्वप्नसुषुप्तिजागरणान्युच्यन्ते सदैवैकरूपेण प्रकाशमानस्य स्वरूपावरणविक्षेपरूपाव
स्थाः कुतस्त्या इत्यर्थः॥२०॥ तस्माच्चिदेकतानस्यात्मनो निर्विशेषस्य सुखं ब्रह्मरूपेण पूर्णत्वमिति सदृष्टा
न्तमाह॥ श्लोकः॥ सर्वमूर्तिविमुक्तं यद्यथा खं सूक्ष्ममद्वयं॥ तेनाप्यस्मि विनाभूतं ब्रह्मैवाहं तथाद्वयं॥२१॥
टीका॥ सर्वमूर्तेरिति॥ यथाकाशं सर्वस्मात् परिच्छिन्नाकारात् स्थूललक्षणमूर्तितः सूक्ष्ममालक्ष्यं ते तथैव
ब्रह्मपरिपूर्णमेत्यन्ते सूक्ष्मं दृष्टाभावोपलक्षितमिष्यते तस्मात् सूक्ष्मणो द्वितीयत्वादात्मनः स्वतदन्यता
दूरेवास्मीत्यर्थः॥ तर्हि ब्रह्माकाशयो रूपमानोपमेयभावेन भेदात् कथं ब्रह्माद्वितीयमित्यत आह॥ तेनापी
ति॥ तेनाकाशेनापि विनाभूतं सिद्धं ब्रह्मास्मि व्यवहारदृष्ट्योपमानादिभेदेऽपि परमार्थतस्तदभावान्ना
द्वैतक्षतिरित्यर्थः॥ एकमद्वयं माकाशं ते संबध्यते द्वितीयं ब्रह्मणो स्यपोनरुक्त्यं॥२१॥ पूर्वमाकाशदृष्टा प६
न्तेन पूर्णत्वनिरूपणात् परमार्थतः परिच्छेदशंका निराकृता इदानीं तेनैव दृष्टान्तेन भेदपरिच्छेदमतीते
गंतिमाह॥ श्लोकः॥ ममात्मा स्वतन्त्रालोकनिभेदो वा न्यो यथा भवेत्॥ एकस्य सुषिभेदेन तथा मम
विकल्पितः॥२२॥ टीका॥ ममात्मेति॥ मम तावदात्मस्वरूपं ब्रह्मेति सत्तः स्वस्यास्ति नयोयमात्मा रम॰ ४२

सीयभावेन भेदप्रतिभासः स एकस्य ममांतःकरणाद्युपाधिकृतभेदपरिच्छेदापेक्षया विकल्पितः
अंतरोपितो भवेद्यथैकस्यैवाकाशस्य घटादिभेदेन भिन्नभेदेनांशांशिभावरूपो भेदो विकल्पितो भवति तद्व
दित्यर्थः॥२२॥ तस्मादविद्यादशायां भेदव्यवहारेपीदानीमवगतात्मतत्त्वस्य सोपि नास्तीति सिद्धमि
त्याह॥ श्लोक॥ भेदाभेदौ तथा नैको नाना चेति विकल्पितं॥ ज्ञेयं ज्ञानं गतिर्गं ता मय्येकस्मिन् कुतो
भवेत्॥२३॥ टीका॥ भेदाभेदाविति॥ मय्येवैकस्मिन् पूर्वं भेदाभेदावेकस्मिन्नोपपद्यतः॥ तथा एको वि
नाना चेति चाहमेव विकल्पितो ज्ञेयं ज्ञानं गतिः फलं गंता फलभागी कर्ता भोक्ता वाहं विकल्पितं इति
योजना॥ एतत्सर्वं कुतो भवेद्विचार्यमाणे न भवेदेवेत्यर्थः॥२३॥ ननु तथापि संसारित्वं हेयं ब्रह्मत्वं चोपादे
५२न यमिति तन्निर्विशेषत्वमात्मन इति चेत्तत्राह॥ श्लोक॥ न मे हेयं न चादेयमविकारी यतोह्यहं॥ सदा मुक्तस्तथा
शुद्धः सदा बुद्धोऽगुणो ह्ययं॥२४॥ टीका॥ न मे हेयमिति॥ तत्र हेतुमाह॥ अविकारीति यतो यस्मादहमवि
कारी कुतो विकारी स्यपेक्षायां तत्र प्रमाणं हि शब्देन सूच्यते॥ अविकार्योयमुच्यते इति स्मृतेरित्यर्थः॥
कालित्रमाह सदा मुक्त इति सदैव बंधसंसर्गशून्य इत्यर्थः॥ तथा शुद्धस्तद्धेतुविद्यासंबंधरहितो यतः स
दा बुद्धः तर्हि किं बोधगुणो नेत्याह अगुणो बोधरूप एवेत्यर्थः॥ तर्हि बोध्यं किंचिदस्ति नेत्याह ह्ययं इति॥२४॥
तदेवमुक्तलक्षणमात्मतत्त्वं शास्त्राचार्यप्रसादात्॥ श्रवणमनननिदिध्यासननिष्ठां प्राप्तः सन् सदसु

अं दम्प

मुमुक्षुरहं ब्रह्मास्मीत्यनुसंदध्यादिति मुमुक्षुं प्रोत्साहयति ॥ श्लोक ॥ इत्येवं सर्वदात्मानं विद्यात्सर्वं समा-
हितः ॥ विदित्वा मां स्वदेहस्थमृषिर्मुक्तो ध्रुवो भवेत् ॥२५॥ टीका ॥ इत्येवमिति ॥ सर्वं पूर्वमुक्तं वेदनफलं
मोहाविद्दित्वेति ॥ ऋषिः सर्वदृशिः ॥२५॥ उक्तं तत्त्वविद उक्तां मुक्तिं प्रपंचयति ॥ श्लोक ॥ कृतकृत्यश्च सि-
द्धश्च योगी ब्राह्मण एव च ॥ य एवं वेद तत्त्वार्थमन्यथात्महा भवेत् ॥२६॥ टीका ॥ कृतकृत्यश्चेति ॥
स ब्राह्मण इति श्रुतेर्मुख्यो ब्राह्मण एव च भवेदिति संबंधः ॥ एवंनिष्ठाहीनस्य ग्रस्य वायमाहात्महेति ॥ उक्तं
श्रीभागवते भगवता ॥ नृदेहमाद्यं सुलभं सुदुर्लभं प्लवं सुकल्पं गुरुकर्णधारं ॥ मयानुकूलेन नभस्वते-
रितं पुमान्भवाब्धिं न तरेत्स आत्महा इति ॥२६॥ उक्तस्य प्रकरणार्थस्य प्रामाणिकत्वं ख्यापयन्प्रतिपत्ति-
सौकर्यमाह ॥ श्लोक ॥ वेदार्थो निश्चितो ह्येष समासेन मयोदितः ॥ संन्यासिभ्यः प्रवक्तव्यः शान्तेभ्यः
शिष्टबुद्धिना ॥२७॥ वेदार्थ इति ॥ अस्य ग्रहणे मुख्याधिकारिणो दर्शयति संन्यासिभ्य इति ॥ न केवलं
प्राप्तसंन्यासाश्रममात्रेभ्यः किंतु शांतेभ्यः शमादिसाधनसंपन्नेभ्य इत्यर्थः ॥ उपदेष्टारं विशिनष्टि
शिष्टबुद्धिनेति शास्त्राचार्यानुशिष्टबुद्धिनेत्यर्थः ॥२७॥ इत्यचक्षुष्ट्वप्रकरणं त्रयोदशं विवृतं ॥१३॥
पूर्वस्मिन्प्रकरणेऽन्तःकरणाविवेकादात्मनि संसारित्वप्रतीतिर्न स्वतः इति शास्त्रप्रामाण्याद्बाधि-
ताज्ञानतत्कार्यो ब्रह्मरूप एवाहमिति निर्धारितं इदानीमन्तःकरणस्य परीक्षणात्संसारप्रतिभासस्य

43

चापरोक्षत्वान्नतस्यानिभासो बुद्ध्याविवेककृत इत्याशंक्यांतःकरणस्यापरोक्षत्वप्रतिपादनपूर्वकं पूर्वोक्त
शास्त्रार्थे युक्तिप्रदर्शनपरं प्रकरणं प्रक्रमते ॥ श्लोक ॥ स्वप्नस्मृत्योर्घटादीनां रूपाभासः प्रदृश्यते ॥ पुरा
नूनं तदाकारा धीर्दृष्टेत्यनुमीयते ॥ १ ॥ टीका ॥ स्वप्नस्मृत्योरिति ॥ हि यस्मात् स्वप्ने स्मृतौ च घटादिविषय
ज्ञानस्य रूपाभासः आकारावभासो दृश्यते ऽनुभूयते तस्मात् पुरा पूर्वं जाग्रदवस्थायामनुभवावस्थाया
मपि नूनमवश्यं तदाकारा घटाद्याकारा धीरंतःकरणवृत्तिर्दृष्टा साक्षादनुभूतेत्यनुमीयत इत्यक्षरार्थः ॥
स्वप्नस्मृत्योर्दृष्टार्थविषयत्वनियमात् पूर्वं दृष्टस्यैवार्थस्य चात्राभावात् स्वप्नस्मृत्योरूपलभ्यमानो वि
षयोऽर्थाकारवृत्तिमदंतःकरणमेवेति जाग्रत्पूर्वानुभवयोरप्यंतःकरणमेवार्थाकारवृत्तिमदपरोक्षम
नुभूतमिति कल्प्यते तस्मात्सर्वास्वप्यवस्थासु वृत्तिमदंतःकरणस्यापरोक्षत्वात्तद्वृत्तिवेदाभासाविवे
कादात्मनः संसारित्वावभासो परोक्षो युक्त इति भावः ॥ १ ॥ एवमंतःकरणस्यापरोक्षत्वे निरूपिते
किमात्मानमालंबन इत्यपेक्षायां दृश्यादंतःकरणादेः संघातात् द्विवेकसिद्धिरात्मनेति सदृष्टांतमाह ॥ श्लोक ॥
भिक्षामटन् यथा स्वप्ने दृष्टो देहो न सः स्वयं ॥ जाग्रद्दृश्यात्तथा देहान्तद्द्रष्टृत्वादन्य एव सः ॥ २ ॥ टीका ॥ भि
क्षामिति ॥ सुप्तस्य यतेः स्वप्ने भिक्षामटन्नुदृष्टो योऽदेहः स स्वयं द्रष्टा न भवति यथा तद्देहात्मत्वमभिम
न्यमानोऽपि तद्भासको न भवति तथा जाग्रद्दृश्यादपि देहात्स जाग्रतोऽन्य एव द्रष्टृत्वादित्यर्थः ॥ देहपदमु

उपं-स· परलक्षणमिंद्रियांतःकरणयोरपि॥तथाचप्रयोगोविमतोदेहादिर्न्नासाद्दृश्यत्वात्स्वप्नदृश्यदेहादिव
४२ दिति॥२॥बुद्धिरेवसर्वास्ववस्थास्वर्थाकाराद्दृश्यतइत्युक्तमर्थंदृष्टांतेनस्पष्टयति॥श्लोकः॥मूषासिक्तंयथा
ताम्रंतन्निभंजायतेतथा॥रूपादीन्व्याप्नुवच्चित्तंतन्निभंदृश्यतेध्रुवं॥३॥टीका॥मूषेति॥मूषांतःसुषि व
रामृत्पात्रिमायथाग्निसंपर्काद्द्रवीभूतंताम्रंमूषायांनिषिक्तंनिक्षिप्तंसत्तन्निभंजायतेतत्समानाकृति
र्भवतितथाचित्तमपिरूपादीन्विषयान्व्याप्नुवत्तन्निभंदृश्यतेतदाकारंजायतइत्यर्थः॥३॥ननुमूषासि व्यो॰भुवे
क्तताम्रस्यकठिनमूषाभिघातेनद्रवस्यापत्तौतदाकारापत्तिरितियुज्यतेचित्तस्यत्वमूर्तत्वाद्विषयैर्व्या
प्याव्यापिकथंतदाकारापत्तिसंभवइत्याशंक्यदृष्टांतरमाह॥श्लोकः॥व्यंजकोवायथालोकोव्यं
ग्यस्याकारतामियात्॥सर्वार्थव्यंजकत्वाद्धीरर्थाकाराप्रदृश्यते॥४॥टीका॥व्यंजकोवेति॥व्यंज
कोऽग्न्यादिरयःपिंडादेरालोकोवाघटादेःस्पष्टार्थः॥४॥बुद्धेरन्वयमुखेनसप्रमसाक्षित्वेनोपपा
दितमपरोक्षत्वमनूद्यव्यतिरेकेणोपपादयति॥श्लोकः॥धीरेवार्थस्वरूपाहिपुंसादृष्टापुरापि
चा॥नेचत्स्वप्नेकथंपश्येत्स्मरेत्वोवाकृतिःकुतः॥५॥टीका॥धीरेवेति॥५॥आलोकादिवद्धीव्यंज
॥श्लोकः॥ कत्वाद्धियोर्थाकारत्वमुक्तंस्पष्टयति॥व्यंजकत्वंतदेवास्यारूपाद्याकारदृश्यता॥दृष्टत्वेचदृ
श्योसादृश्याप्तिःस्यादिंद्रियद्भवेत्॥६॥टीका॥व्यंजकत्वमिति॥अस्याबुद्धेर्यारूपाद्याकारेणदृश्यता राम ४२

निगद्व्याख्यानेपदं २

दर्शनयोग्यताप्राप्तिस्तदेव विषयव्यंजकत्वमित्यर्थः॥ चैतन्यं हि विषयावभासो विषयश्च न बुद्धेरन्यत्र स्वातंत्र्येण स्फु-
रति तथा च बुद्धेर्विषयाकारत्वाभावे चैतन्यस्याविषयात्मना स्फूर्तिरनुपपन्नेति विषयाभिव्यक्त्यर्थं तया तदाकारापत्ति-
रेव बुद्धेर्व्यंजकत्वमित्यभिप्रायः॥ यथा रूपाद्याकारेणावभा[illegible] समानत्वमेव धियो रूपादिव्यंजकत्वं तथा दृशो ऽआत्मनो
धियश्चैव धर्माधर्मयशआदुसन्तोसत्यांतद्व्याप्तिस्तदात्म नास्फुरणमेव द्रष्टृत्वं न परिणाम इत्याह द्रष्टृत्वं चेति॥ य-
पि धियो विषय[illegible]व्याप्तिः परिणाममंतरेण भवति विषयदेशो नस्याः प्रागेवासत्वात्तथापि चैतन्यात्मनो धीवृत्ति आ-
त्मनः परिणामापेक्षा चिदात्मन्येव तत्प्रकाशकत्वलिनाया एव धियः सदोत्पत्तेरिति भावः॥६॥ बुद्धिवृत्तिसा-
क्षित्वेन चिदात्मनः परिणामाभावेपि न तस्य ब्रह्मरूपतयैकत्वं युक्तं प्रतिदेहं तत्तद्बुद्धिसाक्षिभेदादित्याशंक्य
४४ प्रमाणं भावान्मैवमित्याह॥ श्लोक॥ चिन्मात्रज्योतिषा सर्वाः सर्वदेहेषु बुद्धयः॥ मया यस्मात्प्रकाश्यंते स-
र्वस्यात्मा ततो ह्यहं॥७॥ टीका॥ चिन्मात्रेति॥ यथैकस्मिन् शरीरे बुद्ध्यवभासो विकृताच्चिद्व्याप्तिमात्रं तथा
सर्वशरीरगतबुद्ध्यवभास इति भास्यबुद्धिभेदेपि न तदवभासस्वरूपभेदः प्रमाणापृथमवता[illegible]तिभेद- ६१
स्यापि साक्षित्वेन साक्षिधर्मत्वाभावान्नसा[illegible]भेदाशंकावकाश इत्यर्थः॥७॥ चैतन्यस्य सर्वत्रैकत्वेपि (स
दृश्यस्य बुद्ध्यादेरनेकत्वाद्वाद्वयब्रह्मात्मतासिद्धिरित्याशंक्य सकलदृश्यस्यानाद्यनिर्वाच्याविद्या-
विलासबुद्धिमात्रत्वाच्चैतन्यस्याद्वयब्रह्मत्वमविरुद्धमित्युपपादयति॥ श्लोक॥ कारणं कर्म कर्ता च

उप॰स ४४ क्रियास्वप्ने फलं च यथा ॥ जाग्रत्येवं यतो दृष्टा दृष्टा तस्मात्ततोऽन्यथा ॥ ७ ॥ टीका ॥ कारणमिति ॥ यथा
क्रियाकारकफलानि स्वप्ने धीरेव बाह्यार्थस्य तदानीमभावादिति निश्चितं ॥ एवमेव जाग्रति जाग्रद्
वस्थायां च यतो धीरेव क्रियाकारकफलरूपा दृष्टा न चैवं बहिः पदार्थसत्त्वमवगतं तथा सति सुषुप्त्या
वापि तदाकार [illegible] विशेषस्फुरणं कदाचित्स्यात्तस्माद्विषयैः सह बाह्यान्निबुद्धेरन्यत् तु
त्वाज्जस्याध्यासंतत्वेन मिथ्यात्वात्तद्द्रष्टात्मा ततो बुद्धेरन्यथा ऽन्यादृशः सत्योऽखंडैकरसः इत्यर्थः ॥ ८ ॥ अ
न्यथेत्युक्तं स्फुटयति ॥ श्लोक ॥ बुद्ध्यादीनाम नात्मत्वं हेयोपादेयरूपतः ॥ हानोपादानकर्ता त्मा न त्याज्यो न च
गृह्यते ॥ ९ ॥ टीका ॥ बुद्ध्यादीनामिति ॥ बुद्ध्यादयो नात्मस्वरूपधर्मा आगमापायित्वाद् हस्त्यादिवदिति
केचिदात्मनि व्यभिचारमाशंक्य परिहरति हानोपादानेति ॥ बुद्ध्यादेर्हानोपादानयोर्विक्षेपयोः क
र्तात्मा तदधिष्ठानमात्रेण कर्तेत्युच्यते सनकेनचित्त्याज्यो न विलाप्यो न च गृह्यते न विक्षिप्यते आत्मनः
सर्वाधिष्ठानत्वात्तस्य चाधिष्ठानांतराभावादित्यर्थः ॥ ९ ॥ आत्मनः स्वरूपेणाहेयानुपादेयत्वेपि तत्संबंधि
नः प्राप्तस्य बाह्यस्य वस्त्राभरणादेरांतरस्य च पापादेर्हेयत्वमांतरस्य च योगध्यानादेरुपादेयत्वं च भविष्यति
ति न विशुद्धिरात्मन इत्याशंक्याह ॥ श्लोक ॥ सबाह्याभ्यंतरे शुद्धे प्रज्ञानैकरसे घने ॥ बाह्यमभ्यंतरं चान्य
श्री त्कथं हेयं प्रकल्प्यते ॥ १० ॥ सबाह्येति ॥ बाह्याभ्यंतरसहिते बाह्यमाभ्यंतरं चात्मैव न ततः पृथगित्यर्थः ॥ राम॰ ५५
॥ श्रीः ॥

यतः शुद्धः केवलोनोबाह्याभावः तथ्यश्चत्तानेकरसो। तोनांतरमपिपृथगस्ति एकरसत्वंस्पष्टयति॥ घनइति॥ ६
सैंधवघनवद्विज्ञानघनइत्यर्थः॥ हेयमित्युपलक्षणं एवंभूते स्वेआत्मनि कथंहेयमुपादेयंवाकस्यनेत्यर्थः
र्स सत्तास्फु॰ नालिंगितस्यबाह्यस्यांभ्यंतरस्य चो॥ परिवनुमशक्यत्वात्तयोआत्मस्वरूपत्वान्ननतोबाह्यं
र्वाकिमप्यस्ति परमार्थतो यदुपादेयंहेयंवाभवेदितिनात्मनोविशुद्धिसंकोचावकाशइतिभावः॥१०॥ वस्तु
स्वभावानुसारेणविचार्यमाणेनात्मानिहेयाद्यस्तीत्युक्तमिदानींविद्वदनुभवेनाप्ययमर्थोवगम्यतेइत्याह॥ ॥
श्लोक॥ यत्रात्मनेतिनेतीतिपरायोहेनशेषितः॥ सचेद्ब्रह्मविदात्मेष्टो यत्नेनात्र परंकथं॥११॥ टीका॥ यत्रा
त्मेति॥ ब्रह्मविदोज्ञानिनआत्मास्वरूपं कथंयत्नेनकृतकृत्यत्वादित्यर्थः॥११॥ एवंविधमात्मतत्वंनपरानुभव
गम्यमितिस्वयमेवात्मविदाशास्त्राचार्योपदेशानुसारेणविवेक्तव्यमित्याह॥ श्लोक॥ अश्वनायादितो
स्यात तंब्रह्मैवास्मिनिरंतरं॥ कार्यवानैकथंचाहंविमृशेदेवमंजसा॥१२॥ टीका॥ अशनायादितिं॥ षड्र्मिर
हितइत्यर्थः॥१२॥ एवंविमर्शेप्राप्तंसंप्रापणीयमितिकर्तव्यबुद्धिरेवनभवेदितिदृष्टांतेनाह॥ श्लोके॥
५ पारगस्तुयथानद्याः नस्थःपारंयियासति॥ आत्मज्ञश्चेत्तथाकार्यंकर्तुमन्यादिहेच्छति॥१३॥ टीका॥ पा
रगइति॥ नद्याःपारंपरतीरंगतोयथातत्स्थःपरतीरस्थएवतमेवपारंयियासतियातुंप्राप्तुमिच्छति
॥ चेदित्यन्वयः॥ तथा यथोक्तमात्मज्ञोन्यत्कार्यंकर्तुमिष्टंश्रेयोमार्गमिच्छतीतियोजना॥ नैवयियास

उप·स· निनैवे छान्निवेत्यर्थः ॥१३॥ यः पुनरासन्नोपि कार्यवान्स्यात्सन समग्र इत्येतिनेर्निंदति ॥ श्लोक ॥ आसन्न
४९ स्यापि यस्य स्याद्ध्यानोपादानता यदि ॥ न मोक्षार्हः स विज्ञेयो वांतोसौ ब्रह्मणा ध्रुवं ॥१४॥ टीका ॥ आसन्नस्या
१४ पीति स्पष्टार्थः ॥ अनागतां तु ये पूर्वामनक्षत्रां तु पश्चिमां ॥ संध्यां नोपासते विप्रास्ते कथं ब्राह्मणाः स्मृता इति
स्मृतेर्ब्रह्मविदोपि विप्रस्य संध्यावंदनमस्ति कार्यमित्याशंक्य कैमुतिकन्यायेन निराकरोति ॥ श्लोक ॥ सादि
त्यं हि जगत्प्राणस्तस्मान्नाहर्निशो यथा ॥ प्राणज्ञस्यापि न स्यातां कुतो ब्रह्मविदो द्वये ॥१५॥ टीका ॥ सादित्यमिति
आदित्यः सूर्यस्तत्सहितमिदं जगत्सर्वं हि यस्मात्प्राणो हिरण्यगर्भस्तस्मात्प्राणज्ञस्यापि प्राणोहमस्मीति प्रा
णात्मभावमापन्नस्याप्युपासकस्येति यावत् ॥ अहर्निशौ यथा न स्यातामुदयास्तमयरहितस्वरूपत्वात्त
स्याहोरात्रे न स्यातामित्यर्थः ॥ तथा च श्रुतिः ॥ न ह वा अस्मा उदेति न निम्लोचति सकृद्दिवा हैवास्मै भवतीति
स द तथा च प्राणस्यापि प्राणविदोपि भेदहीनो यद्यहर्निशे न स्यातां तदा स्वब्रह्मविदो मुख्यब्रह्मभूतस्याद्वये सर्व
८७ द्वैतावभासरहिते स्वरूपे सति तत्कुतः स्यातां न कुतोपीति को भेद इत्यौ नाभावादेव तत्क्रियामितः कर्तव्यता
भाव इत्यर्थः ॥१५॥ ब्रह्मविदो बाह्यक्रियाभावेपि संध्यं समाधावात्मन्याचरेदिति श्रुतेः ॥ स्वात्मनि नित्यस्थि
तिं परस्मन्मोक्षाय स्मृतिः कर्तव्येत्यत आह ॥ न स्मरत्यात्मनो ह्यात्मा विस्मरेद्वाप्यलुप्तचित् ॥ मनोपि
स्मरतीत्येतत्तु ज्ञानमज्ञानहेतुजं ॥१६॥ टीका ॥ न स्मरतीति ॥ स्मरतेर्योगात्षष्ठी द्वितीयार्थे स्मर
पादिस्मर णयोरभावे हेतुरलुप्तचिदिति ॥ यत्तु श्लोके [illegible] स्वात्मनः स्मरणं न विधातव्यं यतो नाहि तत्त्वज्ञाना द्व राम ४९

र्ममाविर्भावतिरोभावादिविकारइत्यतायेमन एवात्मनं स्मरेदितिविधिःस्यादित्यत आह ॥ मनो

धीति ॥ मनसो ऽचेतनत्वात्स्मर्तृत्वानुपपत्तेर्मनःस्मरतीतिज्ञानमप्यज्ञान हेतुजमविवेकविल .... सितमि

त्यर्थः ॥ ... ॥ तथाचात्मसम्यग्ब्रह्मविद आत्मव्यतिरेकेण मनःपश्यतःसंध्यसमाधावविधिर्नसम्यग्ब्रह्मवि

दइति भावः ॥ १६ ॥ यद्यप्यात्मा ऽलुप्तचिद्रूपत्वान्नात्मानं स्मरतितथापिपरमात्मानं स्मरेदेवेत्याशङ्क्या

ह ॥ श्लोकः ॥ ज्ञातुर्ज्ञेयः परोत्मामासोविद्याकल्पितः स्मृतः ॥ अपोढेविद्ययात्मस्मिन्रज्ज्वांसर्पइवाद्व

यः ॥ १७ ॥ टीका ॥ ज्ञातुरिति ॥ यदिपर आत्माज्ञातुर्ज्ञेयोविषयःस्यात्तदासौ विद्याकल्पितःस्याज्ज्ञानकल्पितो

ऽकल्पितः स्मृतोज्ञातोविद्वद्भिः ज्ञानविषयस्यरज्जुसर्पवदविद्याकल्पितत्वान्नियमात्मआत्मैवनभवति

त इत्यर्थः ॥ तथाच ॥ तस्मिन्नात्मनःपरत्वज्ञेयत्वादिकेविद्यया आत्मयोपोढेबाधितेसतिज्ञातृज्ञेयविभ विद्य

भागाभावादद्वयएवात्माभवतीत्यर्थः ॥ तत्रदृष्टान्तो रज्ज्वांसर्पइवेति ॥ यथारज्जुविद्ययासर्पेबाधि

तेरज्जुरेवावशिष्यतेतद्वदित्यर्थः ॥ १७ ॥ प्रत्यगात्मनोवस्तुतो ऽद्वितीयत्वेपितस्मिन्ममाहमित्याद्यभिसं

सारप्रतिभासत्वाग्निवृत्त्यर्थकमपिकर्तव्यंभविष्यतीत्यत आह ॥ श्लोकः ॥ कर्तृकर्मफलाभावात्सबाह्या

भ्यंतरंह्यजं ॥ ममाहंचेतियोभावस्तस्मिन्कस्यकुतोभवेत् ॥ १८ ॥ टीका ॥ कर्तृकर्मेति ॥ कर्तृकर्म

फलभेदाभावात्सबाह्याभ्यंतरमजमेवात्मस्वरूपंहियतो ऽतस्तस्मिन्नात्मनि ममाहमित्यादिरूपोयो ऽ

उ॰स॰ भावः प्रतिभासः स कस्य भवेत् । कुतो वा हेतोर्भवेन्न भवेदेवेति योजना तस्मात्तज्ज्ञानोत्पत्तेः प्रागेव सर्वकर्त्त-
॥४६॥ त्वतानोद्यमिति भावः ॥१८॥ आत्मविदो देहादावहंकारममकाराभावे हेतुमाह ॥ श्लोकः ॥ आत्मन्येवात्मीय
इत्येष भावो ऽविद्याप्रकल्पितः ॥ आत्मैकत्वे ह्यसौ नास्ति बीजाभावे कुतः फलं ॥१९॥ टीका ॥ आत्मास्यात्मी-
सीयमिति ॥ आत्मैकत्वे ज्ञाते सतीति शेषः ॥१९॥ केन प्रमाणेन तदात्मैकत्वं ज्ञातुं शक्यमित्यपेक्षायां वे-
दांतवाक्यप्रमाणकत्वादित्याह ॥ श्लोकः ॥ द्रष्टृ श्रोतृ तथा मंतृ विज्ञात्रेव तदक्षरं ॥ द्रष्ट्राद्यन्यन्न तत्स्यात्त-
स्मात्तद्रष्टाहमक्षरम् ॥२०॥ द्रष्टृ श्रोत्रीति द्वाभ्यां ॥ यत्तद्द्रष्टृ श्रोतृ विज्ञातृ प्रसिद्धं प्रत्यग्रूपं तदक्षरमेव स-
र्वाधिष्ठानं ब्रह्मैवेति योजना तथा च श्रुतिरक्षरं प्रकृत्याह दृष्टं द्रष्टृ श्रुतं श्रोतृ अमतं मंतृ अविज्ञातं विज्ञातृ नेति
तथा नान्यदतोस्ति द्रष्टृ ... नान्यदतोस्ति श्रोतृ नान्यदतोस्ति मंतृ नान्यदतोस्ति विज्ञातृ इत्युत्तर-
वाक्यमाह ॥ द्रष्ट्रादीनि ॥ तत् द्रष्ट्रादि प्रत्यग्रूपं तस्मादक्षरादन्यन्न भवतीत्यर्थः ॥ यस्मादेवमविष-
यभूतमेवाद्वयमात्मतत्त्वं श्रुतिसिद्धं तस्माद्द्रष्टाहमक्षरमित्युपसंहारः ॥२०॥ प्रत्यगात्मनोक्षरब्रह्मात्म-
त्वे विकल्पमद्वयात्मत्वासिद्धिरित्याशंक्य एतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चेति श्रुत्यर्थं ओ
वदन्नद्वयात्मत्वं साधयति ॥ श्लोकः ॥ स्थावरं जंगमं चैव द्रष्टृत्वाद्यादिक्रियायुतं ॥ सर्वमक्षरमेवातः
सर्वस्यात्माक्षरं त्वहं ॥२१॥ स्थावरेति ॥ उपाधिरूपाहितमुपाध्याधारश्चेति सर्वमक्षरमेवातो राम

॥टीका॥ ४७

दृमक्षरंसर्वस्यात्मास्वरूपंनमदन्यत्किमप्यस्तीत्यर्थः॥२१॥स्थावरादिसर्वमक्षरमित्युक्तेसमयंत्वमेवाक्षर
मात्मेतिप्रतिभासात्रांकावारयन्नागमिकमात्मज्ञानंस्फुटयति॥श्लोक॥अकार्यशेषमात्मानमक्रियात्सक्रि
याफलं॥निर्ममंनिरहंकारंयःपश्यतिसपश्यति॥२२॥टीका॥अकार्यशेषमिति॥अकार्यशेषत्वमकर्तृत्वंत
त्रहेतुरक्रियात्मेतिक्रियास्वरूपतत्फलादिविलक्षणमित्यर्थः॥क्रियातत्फलसंसर्गशून्यमितिवाकुतोयतोनि
र्ममंतदपिकुतोऽनहंकारंएवंविधमात्मानंयःसम्यक्पश्यतिसएवतत्त्वदर्शीत्यर्थः॥२२॥आत्मविदोऽहंकार न
[illegible]ध्यभावादकर्मशेषत्वमुक्तंप्रपंचयंस्तस्यकृतकृत्यत्वमाह॥श्लोक॥ममाहंकारयत्नेभ्यःशून्या ना।
एवस्वभावतः॥आत्मनीतियदिज्ञानमार्थस्वस्थाःकिमीहितैः॥२३॥ममाहंकारेति॥टीका॥आत्मनिस्व
भावतःस्वात्मएवाविद्याप्रयुक्तदेहाद्यभिमानंविनानसंतीत्यर्थः॥हेमुमुक्षवःयद्येवंज्ञानंतर्हिस्वस्थाभि
र्वे [illegible]ताःसंतआर्थतिष्ठतकिमीहितैःकर्मभिःकृत्यंज्ञानेनैवकृतकृत्यत्वात्कर्मणांचानधि[illegible]कृतानांविफ
लत्वाच्चेत्यर्थः॥२३॥देहाद्यतिरिक्तात्मज्ञानवतःसर्वेषुपारलौकिककर्मस्वधिकाराभ्युपगमादात्मविदो
पिसफलंकर्म[illegible]इत्याशंक्यतस्यात्मतत्त्वविदत्वमेवनास्तीत्याह॥श्लोक॥योऽहंकर्त्तारमात्मानंनतथावेत्ता
रमेवच॥वेत्यनात्मज्ञएवासौयोन्यथाज्ञःसआत्मवित्॥२४॥टीका॥योऽहंकर्तारमिति॥कस्तर्ह्यात्मवि
दित्यतआहयोन्यथाज्ञइति॥योकर्तारमज्ञातारमभोक्तारंचात्मानंजानातिसआत्मतत्त्वविदित्यर्थः॥२४॥

उप॰स॰ किमिति कर्त्रात्मेति जानतो नात्मा विवमात्मस्मेव कर्तृत्वादि भातिभासादित्याशंक्य कर्तृविवेकनिबंध
६७ नोयं भ्रमइत्यभिप्रेत्याह ॥ श्लोक ॥ यथान्यत्वेपि तादात्म्यं देहादिष्वात्मनो मतं ॥ तथा कर्तुरविज्ञानात्स्वे
लकर्मात्मना मतः ॥ २४ ॥ टीका ॥ यथान्यत्वेपीति ॥ यथा परमार्थतो देहादिभ्योन्यत्वेप्यात्मनस्तेषु
भि॰ष्ठं तादात्म्यमाध्यासिकं मतं तथा कर्तुरभोक्तुरविज्ञानादात्मनः फलकर्मात्मता भोक्तृकर्त्रात्मता मत
तायथा स्थूलदेहात्मनोरभेदाध्यासान्मनुष्यत्वाद्यभिमानस्तथाहंकारप्रधानालिंगदेहाविवे॥
कात्कर्तृत्वाद्यभिमानो मिथ्याबुद्धिरित्यर्थः ॥ २५ ॥ नन्वहंकारस्यैवात्मत्वात्कथमहंकारात्मनोरवि
वेकइत्युच्यतइत्यत आह ॥ श्लोक ॥ दृष्टिः श्रुतिर्मतिर्ज्ञातिः स्वप्ने दृष्टा जनैः सदा ॥ तासामात्मस्व
रूपत्वादतः प्रत्यक्षता त्मनः ॥ २६ ॥ टीका ॥ दृष्टिरिति ॥ दृष्ट्यादिशब्दैश्चक्षुरादिद्वारकांतःकरणवृत्त
योनिर्दिश्यंते तास्तु सदैव स्वप्नेजनैर्दृष्टाः सद्वात्तिकस्यांतःकरणस्य स्वप्ने वेद्याकार त्वात्तद्दृष्टिनान्यः
साक्षीसिद्धइत्यभिप्रायः ॥ किंचतासां दृष्ट्यादीनामात्मस्वरूपत्वादित्ययमर्थः ॥ सुषुप्ते सद्वृत्तिकर
स्यांतःकरणस्याविद्यामानत्वपात्मन्यारस्तमयादात्मनश्चानस्तमयात्स्वतस्तस्यादृष्टिनीयापरोक्षतैन्मा
त्रतयावभासमानत्वात्सुकांतःकरणादहंकारादिरूपादात्मनोव्यतिरेकासिद्धिरिति ॥ यत्तएवम राम
६७

48

तः आत्मनः प्रत्यक्षत्वात् साक्षिमा[illegible]नीत्रेण स्वयंप्रकाशमानतया नित्यापरोक्षब्र
ह्मरूपत्वात् सिद्ध इत्यर्थः ॥२६॥ एवमशेषप्रमातृसाक्षिभूततया प्रत्यगात्मनो ब्रह्मत्वापादने लाभं दर्शयन्नस्य
येथाज्ञः सन्न्यासविदे तत्रोक्तमप्यविदं स्पष्टीकरोति ॥ श्लोक ॥ परलोकभयं यस्य नास्ति मृत्युभयं तथा ॥ त य
स्यात्मज्ञस्य शोच्याः स्युः सब्रह्मेन्द्रा अपीश्वराः ॥२७॥ टीका ॥ परलोकभयमिति ॥ यस्य परलोकभयं परलोक
निमित्तं भयं किमहं साधु नाकरवं किमहं पापमकरवमित्यादिरूपं नास्ति नैनं कृताकृते तपत इति श्रु
६ नास्ति तेः ॥ तथा यस्य मृत्युभयं मरणभयं [illegible] भयं भवतीति श्रुतेः ॥ तस्यात्मज्ञस्य ब्रह्मेन्द्राद्या अपि ज्ञाने
श्वर्यसंपन्नतया ईश्वरा अपि शोच्याः शोचनीयाः स्युः अहो एते ऐश्वर्यासक्ततया व्यग्राः कथं स्वस्थाः स्युः
ति तस्याद्यः परलोकमरणनिमित्तभयनाहेत्वहंकारादिशून्यतया ब्रह्मनिष्ठः स एवात्मज्ञो विपरी वि
त इति सिद्धं ॥२७॥ ब्रह्मेन्द्रादिभावस्य सर्वैः प्रार्थ्यमानत्वात् कथं शोच्यत्वमित्याशंक्य ब्रह्मात्मज्ञानादूर्ध्वं
न किमपि प्रार्थ्यमस्तीत्याशयेनाह ॥ श्लोक ॥ ईश्वरत्वेन किं तस्य ब्रह्मेन्द्रत्वेन वा पुनः ॥ तृष्णा चेत् सर्व
तश्छिन्ना सर्वदैन्योद्भवा शुभा ॥२९॥ टीका ॥ ईश्वरत्वेनेति ॥ सर्वत्र दैन्यस्योद्भवो यस्याः सा तथा अत ए
वाशुभा पापप[illegible] प्रवृत्तिद्वारत्वात् ॥ सा तृष्णा चेत् सर्वतः सर्वात्मना समूलेन छिन्नेत्यर्थः ॥ तथा च ह
श्रुतिः ॥ यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः ॥ अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इति ॥२९॥

उ. स. निर्ममो निरहंकारो यः पश्यति स पश्यति इत्युक्तं सम्यग्ज्ञात्मज्ञस्य लक्षणमाह ॥ श्लोक ॥ ओं अहमित्यात्मधी
४८ त्या र्या न ममसैमी यथा रपि ॥ अर्थभूम्येयदा यस्य स आत्मज्ञो भवेत्तदा ॥२९॥ टीका ॥ अहमिती ति ॥ यस्य शास्त्र
चार्यानुग्रहात्तस्य पदार्थद्वय विवेकतो हम ममेति चात्मात्मीय विषयाधियावर्थभूम्ये प्रयोजनभूम्येयदा
स्यातां तत्प्रयुक्त व्यहारहीनः पुमान्यदि स्यादित्यर्थः ॥ तदा स आत्मविद्भवेद्देहादौ तदनुबंधेन व्यवहार
पि कालेपूर्ववद्वस्तुत्वोद्धेतु रवरहिततया आत्ममात्रदर्शि सम्यगात्मविदित्यर्थः ॥२९॥ यदेवमात्मज्ञानं वाक्या
तदा द्भवति किं तत्कृतत्वान्न तस्य कार्यशेषता संभवतीति प्रागुक्तमकार्यशेषत्वं प्रपंचयति ॥ श्लोक ॥ बुद्ध्यादेः
सत्युपाधौ च न तथा सत्यविशेषता ॥ यस्य चेदात्मनो ज्ञातात्तस्य कार्यं कथं भवेत् ॥३०॥ टीका ॥ बुद्ध्यादावि
ति ॥ जाग्रत्स्वप्नयोर्बुद्ध्यादावुपाधौ सति तथा सुषुप्ताव सतिच यस्यात्मनो विशेषता चेत् ज्ञाता चेद्बुद्धे ले
संदेहे पि संदेहवचनो वेदाश्चेत्प्रमाणमिति चेत् ॥ तस्याविशेषोज्ञस्य कार्यं कथं भवेन्न कथंचिदि
त्यर्थः ॥३०॥ आत्मविदो नास्ति कार्यमित्यत्र हेत्वंतरमाह ॥ श्लोक ॥ प्रसन्ने विमले व्योम्नि प्रज्ञाने करसे
हये ॥ उत्पन्नात्मधियोवृत्तं किमप्यस्ति कार्यमिष्यते ॥३१॥ टीका ॥ प्रसन्न इति ॥ व्योम्नि व्योमसदृशो
प्रसन्ने स्वतो दोषरहिते विमले आगंतुकमलवर्जिते उक्तविशेषणद्वय साधकं क्रमेण विशेषणद्वय राम
प्रज्ञाने करसे ह्वयेति ॥ एतास्मिन्ब्रह्मणि उत्पन्नात्मधी रात्मेति मात्र बोधो ब्रह्मैवात्मेति बुद्धिर्यस्य तस्या ४८

सस्वरूपज्ञानादन्यत्किंकार्यमित्यत्रोतन्द्रुतनाकिमपीत्यर्थः॥२१॥ननुशास्त्राचार्यप्रसादादेवंतत्त्वेयगम्यमानेपिश्रे
योमार्गप्राप्तिप्रतिबंधकस्यशत्रोःसंभवेतत्परिहारार्थंकिमप्यनुष्ठेयंस्यादितिचेन्नेत्याह॥श्लोक॥आत्मानंस
र्वभूतस्थममित्रंचात्मनोपियः॥पश्यन्निकृत्यसोनूनंशीलितिकर्तुंविभावसुं॥२२॥टीका॥आत्मानमिति॥यथो
ष्मस्वभावस्याग्निभावसोःशीलस्वभावतापादनंनसंभाव्यतेतथासर्वभूतात्मभूतस्यशत्रुमित्रादिसंभावेदुः ना।
संपादेतिनानुष्ठेयंकस्तनावसैद्इत्यर्थः॥२२॥आत्मनःकार्यशेषत्वंकिंसोपा[illegible]धिकस्येष्यतेनिरूपाधिकस्य
॥श्लो०॥ वेतिविकल्प्याद्यमंगीकृत्यद्वितीयंदूषयति॥प्रज्ञाप्राणानुकार्यात्माछायेवार्क्षादिगोचरः॥ध्यायतीवेति
चोक्तोहिशुद्धोमुक्तःस्वतोहिसः॥२३॥टीका॥प्रज्ञेति॥प्रज्ञाबुद्धिःप्रज्ञाप्राणावनुकर्तुंशीलमस्यास्तीति
प्रज्ञाप्राणानुकारीप्रज्ञाप्राणोपाधिकइत्यर्थः॥२छायेवसूर्यादिप्रतिबिंबमिवजलेऋक्षादिगोचरइंद्रिय
यत्नद्वारकवृत्तिषुप्रतिबिंबितआत्मातद्विवेकात्करोतिध्यायतीवलेलायतीवेतिश्रुत्योक्तस्त्सात्‌दः वेति
शायांकर्मशेषत्वमस्त्वेवानोऽपिस्वतःशुद्धोमुक्तश्चबुद्धिसत्त्वात्माभत्रतिनुदकानुगतत्वेनसूर्यस्यकंपादि
मत्याभासमानत्वेपिनपरमार्थतःसूर्यःकंपादिमान्भवति॥तथाचोप[illegible]धिकिग्भेदविपर्या
[illegible] सादिविंमाद्धायहीनंकर्मात्मतः त्वचिरंनदीकेतैंइत्यर्थः॥२३॥निरूपाधिकस्यात्मनोनकर्मशेषत्व
[illegible] मित्युक्तंमुपपादयन्प्राप्ताभ्यामानुषडाचरोदित्यादियत्निधर्मविधिशेषत्वापिनास्यास्तीत्याह॥श्लो०॥

नप्राप्नोति

उप॰स अप्राणस्यामनस्कस्य तथासंसर्गिणो द्विज॥ व्योमवद्व्यापिनोप्यस्य कथं कार्यं भवेन्मम॥२४॥टीका
५९ अप्राणस्येति॥क्रियाशक्तिप्राणहीनस्य ज्ञानशक्तिमनोहीनस्य स्वभावत्तो ऽसंसर्गिणो ऽसंगस्य व्यो
मवदपरिछिन्नस्य स्वतश्चलनशक्तिरहितस्योत्रियाप्यत्तद्देशि[illegible] देकरस्य स्यास्येवंविधस्य मम कुत्र कथं का
र्यं भवेन्न कथमपीत्यर्थः॥२४॥ननु नैकाग्र्यं मनः कृत्वा यत्तचित्तेंद्रियक्रियः॥उपविश्यासने युंज्याद्योगमा
त्मविशुद्धये इत्यादि भगवद्वचनात् मनःसमाधानानुष्ठानेनात्मशुद्धिः संपाद्यावशिष्यत इत्याशंक्य तस्याः
स मे प्रागेव सिद्धत्वान्नेदानीमस्त्यवसर इत्याह॥श्लोकः॥असमाधिं न पश्यामि निर्विकारस्य सर्वदा॥ब्रह्मणो
मे विशुद्धस्य [illegible]शोध्यं नाप्यद्य पाप्मनः॥२५॥असमाधिमिति॥टीका॥विकारोद्भव[illegible] समाधिर्नाम
मनसो हेतूपाधिभूत्स्य[illegible]नया सदा निर्विकारस्य तत्त्वं पश्यामि ब्रह्मभूतस्यात[illegible] एव सर्वदा विशुद्धस्य प्रागे
निस वाविपाप्मनो निवृत्तकल्मषस्य शोध्यं कामप्यन्न पश्यामीत्यर्थः॥२५॥ननु नमै पश्यामीत्युक्तं गंतव्यं ब्र गे
ह्मलोकादेर्गमनसाधनस्यार्चिरादिमार्गस्य च ब्रह्मविदोपि ज्ञातव्य[illegible]त्वादिसाशंक्य सगुणब्रह्म
विदस्तथात्वेपि न निर्गुणब्रह्मविदस्तथात्वमिति सहेतुकमाह॥श्लोकः॥गंतव्यं च न तथा नैव सर्वगस्या
चलस्य च॥नोर्ध्वं नाधस्तिरो वापि निष्कलस्यागुणत्वतः॥२६॥टीका॥गंतव्यमिति॥गंतव्यमिति
॥भावकर्मणोस्तत्त्वेण गृहणंतथा च सर्वगत्वेन चलनासमर्थात् इत्तव्यं नै राम

व
चपश्यामि गमनथा त्वर्थं नैव पश्यामीत्यर्थः ॥ तथा गंतव्यं गंतारमप्राप्य देशं स्थानविशेषं न पश्यामि कुत इत्यत
तिर आह ॥ नोर्ध्वमिति ॥ इति पुरस्तात्पश्चाद्दक्षिणं चोत्तरं चनैव पश्यामीत्यनुषंगः कुतो देशभेदाभाव इत्यत
आह ॥ निष्कलस्येति ॥ पूर्णस्येत्यर्थः ॥ कुतो निष्कलत्वं ज्ञानसुखादिगुणात्मकावयवयोगादित्यत आह ॥ गु अ
णत्वमिति ॥ ज्ञानसुखयोः स्वरूपत्वात्संसर्गिगुणस्य चासंगे मय्यसंभवाद्गुणतोपि विभागशून्यस्येन ग
न्तव्यं प्राप्यं गन्तृः प्राप्तिर्वा विद्यत इति न तत्साधननिष्ट विधानावकाश इत्यर्थः ॥ २६ ॥ किंचाज्ञानोपा
धिं विना मनि नित्यमुक्ते कस्यापि विशेषस्योपेक्षितुमशक्यत्वादज्ञानस्यैवाज्ञानस्वभावेवस्तुनोऽसंभा पंज्ञानस्य
50 व्यमानत्वान्न कदाप्यात्मनः क्रियायोग्यतेति स्थिते कुत इदानीमज्ञानप्रतिभासस्याप्यभावे कर्मशेष
ता स्यादित्यभिप्रेत्याह ॥ श्लोकः ॥ चिन्मात्रज्योतिषो नित्यं तमस्तस्मिन्न विद्यते ॥ कथं कार्यं ममेवात्र
नित्यमुक्तस्य शिष्यते ॥ २७ ॥ टीका ॥ चिन्मात्रेति ॥ तस्मिन्नात्मनि तमः स्वरूपतः प्रतिभासतो(?)पि नावि
द्यते कुतः चिन्मात्रज्योतिषः ज्योतिष्टुल इति भागप्रथा नोनिर्देशः ॥ सुगममन्यत् ॥ २७ ॥ किंचाज्ञाना
भावे बाह्यान्तःकरणतत्संसर्गाभावात्तेर्विना सर्वोभावात्त्वमेकमोवसर इत्याह ॥ श्लोकः ॥ अमनस्कस्य स्य
का चिंता क्रियावानिंद्रियस्य का ॥ अप्राणो ह्यमनाः शुभ्र इति सत्यं श्रुतेर्वचः ॥ २८ ॥ टीका ॥ अमन
स्कस्येति ॥ प्राणमनोविहीनत्वेप्राणमाह ॥ अप्राणो हीति ॥ श्रुतेर्वचः ॥ स सं स्वार्थं निर्दोषत्वया

उ॰स॰ स्वतःप्रमाणत्वादित्यर्थः॥२८॥अपरात्रादिकालस्याविविक्तपूतादिदेशस्यशास्त्रादिदिग्विशेष
५० स्यमनोविक्षेपरहितस्यराहूपरागादिनिमित्तस्यचप्रतीक्ष्यात्मचिंतनकर्त्तव्यत्वात्कथंकार्या
भावइत्याशंक्याह॥श्लोकः॥अकालत्वादिदेशत्वादहृत्कादनिमित्ततः॥आत्मनोनैवकालादेरपेक्षा
ध्यायतःसदा॥२९॥टीका॥अकालत्वादिति॥सदात्मानंध्यायतोयतेर्नैवकालादेरपेक्षास्तीतियोज
ना॥तत्रहेतुरात्मनोकालत्वादित्यादिः॥आत्मस्वरूपस्यकालाद्यनिबंधनत्वात्तत्ध्यानेनदपेक्षेत्यर्थः॥
नृथाचाह॥भगवान्सूत्रकारःयत्रैकाग्रतातत्राविशेषादिति॥३०॥ब्रह्मविदोदेशकालादिसमपेक्षोक
र्मण्यपेक्षाभावेपिप्रयागादितीर्थेस्यादपेक्षागंगातीरेचसोत्रिंस्यंभिक्षुर्मोक्षपरायणइत्यादिस्मृति
विहितत्वादित्याशंक्यब्रह्मात्मज्ञानरूपेतीर्थेसाक्षान्मुक्तिहेतौस्नातस्यात्मविदोनतीर्थांतरापेक्षा
स्तीत्याह॥श्लोकः॥यस्मिन्देवाश्चवेदाश्चपवित्रंकृत्स्नमेकतां॥व्रजेत्तन्मानसंतीर्थंयस्मिन्स्नात्वा
ऽमृतोभवेत्॥४०॥टीका॥यस्मिन्निति॥यस्मिन्ब्रह्मात्मस्फूर्तिरूपेदेवास्तत्तीर्थस्थानविशेषाः
धिष्ठातारोमाधवविश्वेश्वरत्रिविक्रमादयःपूजादर्शनस्पर्शनस्मरणादिभिर्भक्तपावनाःप्रसिद्धा
स्तथावेदाश्चऋग्यजुःसामाथर्वाख्याअध्ययनब्रह्मयज्ञपाठार्थानुष्ठानादिभिःपावयंतितथाकृ
त्स्नंपवित्रंपावनंतीर्थविशेषंहरिहरनामोच्चारणादिएतत्सर्वमेकतामेकत्वंव्रजेद्यस्मिन्सरि राम
५०

तश्चसागरे संभवं नीत्यर्थः॥सर्वात्मकब्रह्माविर्भावरूपत्वादित्तिपरमोहेतुरत्रानुसंधेयः॥तन्मानसं
